दशकुमारचरितम् ।

महामहोपाध्याय श्रीमद्दण्डि पण्डित विरचितम्

गवर्णमेण्टसंस्कृतविद्यालयसाहित्याध्यापक

श्रीमदनमोहनतर्कालङ्कारैः

संस्कृतम्

संस्कृत यन्त्रे मुद्रितम्

कलिकातायाम्

संवत् १९०६ ।

मध्येवेगोदामे राजपुत्रो राजाज्ञया रक्षिभिः उपलब्धे च सुनि मञ्जुबन्धयोः।

गते च तस्मिन् मुमुक्षौ तदङ्घ्रियुगलं रजतशृङ्खलया। सा चैनं चन्द्रलेखाच्छविः काचिदङ्गना भूत्वा प्रदक्षिणीकृत्य प्राञ्जलिर्व्यजिज्ञपत् देव दीयतामनुग्रहार्द्रं चित्तम्। अहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम सुरसुन्दरी। तस्या मे नभसि नलिनलुब्धमुग्धकलहंसानुबद्धवक्त्राया उच्छ्रिवारसंक्षोभविच्छिन्नविगलिता हारयष्टिरंशुकधया जातु हैमवते सरसि मन्दोदके मग्नोन्मग्नस्य महर्षेर्मार्कण्डेयस्य मस्तके मणिकिरणविद्गुम्फितपलितमपतत्। पातितश्च कोपितेन कोऽपि तेन मयि शापः "पापे भजस्व लोहजातिमज्ञातचेतना सतीति"। स पुनः प्रसाद्यमानस्त्वत्पादपद्मद्वयस्य मासद्वयमात्रं सन्दानतामेत्य निस्तरणीयामिमामापदम् अपरिक्षीणशक्तित्वं चेन्द्रियाणामकल्पयत्। अनन्तेन च पाप्मना रूप्यशृङ्खलीकृतां मामिक्ष्वाकुराजोऽवेगवतः पौत्रः पुत्रो मानसवेगस्य वीरशेखरो नाम विद्याधरः शङ्करगिरौ समध्यगमत् आत्मसात्कृता च तेनाहमासम्। अथासौ पितृप्रयुक्ते वैरे वर्त्तमाने विद्याधरचक्रवर्त्तिनि वत्सराजवंशवर्द्धने नरवाहनदत्ते विरसाशयश्छद्मप्रकारक्षमोऽयमिति तपस्यता दर्पसारेण सह समसृज्यत प्रतिश्रुतश्च तेनास्मै स्वसुरवन्तिसुन्दर्याः दानम्। अन्यदा तु वियति व्यवदायमानवन्द्रिके मनोरथप्रियामवन्तिसुन्दरीं दिदृक्षुरस्त्रञ्चिद्रयक्तदिव्यमन्दिरद्युति कुमारीपुरमुपासरत्। अन्तरितश्च तिरस्करिण्या विद्यया तां तदा त्वदङ्गोपाश्रयां सुरतखेदसुप्तां त्रिभुवनसर्गबाधासंहारसंमिताभिः कथाभिरम्नसस्यन्दिनीभिः प्रत्याशीयमानशरामपूरां न्यरूपयत्। स तु प्रकुपितोऽपि त्वदनुभावप्रतिबद्धनिग्रहान्तराध्यवसायः समाक्षिप्तरतरेतरमवन्तसुखप्रसुप्तयोर्युवयोर्दैवदत्ताशाहः पापुलाशात्मना मया पादपद्मयोर्युगलं तव निगडयित्वा सरोवरभसमपासरत्। अवस्थितश्च ममाद्य

शापः तव मात्सर्यं तव पारतन्त्र्यम्। प्रसीदेदानीं किं तव कर-णीयमिति प्रणिपतन्तीं वार्त्तयानया मत्प्राणसमां समाश्वासयेति आदिश्य विससर्ज।

तस्मिन्नेव क्षणान्तरे हतोहतश्चण्डवर्म्मा सिंहवर्म्मदुहितुरम्बालि-कायाः पाणिस्पर्शरागप्रसारिते बाहुदण्ड एव बलवदवलम्ब्य सरभ-समाकृष्य केनापि दुष्करकर्म्मकारिणा तस्करेणैकेनैव क्षुरप्रहारेण राजमन्दिरोद्देश एव व्यापादितमयमापादयन्नचलितमतिरसौ विहरतीति वाचः समभवन्। श्रुत्वा चैतत् तमेव मत्तहस्तिनमुद्धताधोरणोराज-पुत्रोऽधिरुह्य रंहसोत्तमेन राजभवनमभ्यवर्त्तत। तत्र च रभसाव-धूतपत्तिदत्तवर्त्मा च प्रविश्य वेश्माभ्यन्तरम् अदभ्राभ्रनिर्घोषगम्भीरेण स्वरेणाभ्यधात् "कः स महापुरुषः येनैतन्मानुषमात्रदुष्करं महत् कर्म्मानुष्ठितम् आगच्छतु मया सहेमं मत्तहस्तिनमारोहतु अभयं मदुपकण्ठवर्त्तिनो देवदानवैरपि विग्रहमाणस्येति"।

निशम्यैवं स पुमानुपोढहर्षो निर्गत्य कृताञ्जलिराक्रम्य संज्ञा-कुञ्चितं कुञ्जरमाश्रमसक्तमध्यरुक्षत्। आरोहन्तमेवैनं निर्वर्ण्य हर्षोत्फुल्लदृष्टिः अये प्रियसखोऽयमपहारवर्म्मैवेति पश्चान्निषीदतोऽस्य बाहुदण्डयुगलमुभयभुजमूलप्रवेशितम् अग्रेऽवलम्ब्य स्वमङ्कमाचि-क्रुयामास स्वयञ्च पृष्ठतोवस्थिताभ्यां भुजाभ्यां पर्य्यवेष्टयत्। तत्-क्षणोपसंहृतालिङ्गनव्यतिकरश्चापहारवर्म्मा चाप चक्र कणप कर्पण प्रास पट्टिश मुषल तोमरादिप्रहरणजातमुपयुञ्जानो बलावलिप्तान् प्रतिबलवीरान् अङ्गप्रत्यङ्गयोधिनः परिक्षिपतः क्षितौ विचिक्षेप। क्षणेन चाद्राक्षीत्तदपि सैन्यमन्येन समन्ततोऽभिमुखमभिधावता बलनिकायेन परिक्षिप्तम्।

अनन्तरञ्च कश्चित्किशोरगौरः कुन्दविन्दसवर्णकुन्तलः कमल-कोमलपाणिपादः कर्णचुम्बिदुग्धधवलस्निग्धनीलनयनः कटितटनि-विडरत्नखड्गः पट्टनिवसनः क्षामक्षामोदरोरस्थलः कृतहस्ततया रिपु

कुलमिव वर्षैर्वाभिवर्धनं पादाङ्कुरमिव राज्यवृक्षस्य संभूषेन प्रजविना अग्रेण सन्निकृष्य पूर्व्वोपदेशप्रत्ययादयमेव स देवो राजवाहन इति प्राञ्जलिः प्रथम्योपहारवर्म्माभि निविष्टहृष्टिराचष्ट "त्वदादिष्टेन मार्गेण सन्निपातितमेतदङ्गराजस्य सहायदानायोपस्थितं राजन्यकम् अरिवर्गश्च विहतविध्वस्तं जीवग्राहग्राहितं वर्त्तते किमन्यत्कृत्यमिति,, व्याजहारापहारवर्म्मा देव हस्तिदानेनानुगृहीताभयमाभ्याचरः। सोऽयमप्यद्यैवामुना रूपेण धनमित्राख्यया चान्तरितो मन्तव्यः। सपदायं निर्गमय्य चम्पादङ्गराजम् अपवर्जितश्च कोशवाहनमेकीकृत्य चण्डवर्म्मणामुना सह राजन्यकेन एकान्ते सुखोपविष्टमिव देवमुपतिष्ठतु यदि न दोषइति। देवोऽपि यथा ते रोचत इति तमाभाष्य गत्वा च तन्निर्दिष्टे नगराद्बहिरतिमहतो रोहिद्रुमस्य कस्यचित् क्षौमावदातसैकते गङ्गातरङ्गपवनपातशीतले तले द्विरदादवततार। प्रथमसमवतीर्णेनापहारवर्म्मणा च सहचरसत्वरसमीकृते मातङ्ग इव भागीरथीपुलिनमण्डले सुखं निषसाद।

तथा निषण्णश्च तमुपहारवर्म्मार्थपाल प्रमति मित्रगुप्त मन्त्रगुप्त विश्रुतैर्मैथिलेन च प्रहारवर्म्मणा काशीभर्त्रा च कामपालेन चम्पेश्वरेण सिंहवर्म्मणा सहोपागत्य धनमित्रः प्रणिपपात। देवोऽपि हर्षाविष्टमभ्युत्थितः कथं सम एवत्र मित्रगणः समागतः को नामायमभ्युदयइति कृतयथोचितोपचारानुत्पीडिततरं परिरेभे काशीपतिमैथिलाङ्गराजांश्च सुहृन्निवेदितान् पितृवदपश्यत्। तैश्च हर्षकम्पितपलितं जरभवोपगूढः परमभिननन्द। ततः प्रवृत्तासु प्रीतिसङ्कथासु प्रियवयस्यगणानुयुक्तः स्वस्य च सोमदत्तपुष्पोद्भवयोश्चरितमनुवर्ण्य सुहृदामपि वृत्तान्तं क्रमेण श्रोतुं कृतप्रसादः तांश्च तदुक्तावन्वयुङ्क्त। तेषु प्रथमं प्राह स्म किलापहारवर्म्मा।

इति दशकुमारचरिते प्रथम उच्छ्वासः।

द्वितीय उच्छ्वासः ।

अपहारवर्म्मचरितम् ।

देव त्वयि तदावतीर्णे द्विजोपकारायासुरविवरं त्वदन्वेषणप्रसृते च मित्रगणे अहमपि महीमटन् अङ्गेषु गङ्गातटे बहिश्चम्पायाः कश्चिदस्ति तपःप्रभावोत्पन्नदिव्यचक्षुर्मरीचिर्नाम महर्षिरिति श्रुतवांश्च-पतोजनसमाजादुपलभ्य अमुतोऽनुभर्तुराकूतिं तमुद्देशमगमम् अद्रा-क्षञ्च तस्मिन्नाश्रमे कस्यचिच्चूतपोतकस्य छायायां कमप्युद्विग्नवर्णं ताप-सम् । अमुना चातिथिवदुपचरितः क्षणं विश्रान्तः क्वासौ भगवान् मरीचिस्तस्मादहमुपलिप्सुः प्रसङ्गप्रापितस्य सुहृदो गतिम् आश्चर्य्य-ज्ञानविभवो हि स महर्षिर्मया विश्रुत इत्यवादिषम् ।

अथासावुष्णमायतञ्च निश्वस्याशंसत् । आसीत्तादृशो मुनिरस्मि-न्नाश्रमे । तमेकदा काममञ्जरी नामाङ्गपुर्य्यवतंसस्थानीया वारयुवति-रश्रुबिन्दुतारकितपयोधरा सनिर्वेदमभ्येत्य कीर्णशिखण्डास्तीर्णभूमि-रभ्यवन्दिष्ट । तस्मिन्नेव च क्षणे मातृप्रमुखस्तदाप्तवर्गः सानुक्रोश-मनुप्रधावितस्तत्रैवाविच्छिन्नपातमपतत् । स किल कृपालुस्तं जन-मार्द्रया गिराश्वास्य आर्त्तिकारणं तां गणिकामपृच्छत् । सा तु सव्रीडेव सविषादेव सगौरवेव चाब्रवीत् । भगवन्नैहिकस्य सुखस्या-भाजनं जनोऽयम् आमुष्मिकाय श्रेयसीयाय आर्त्ताभ्युपपत्तिवित्तयो-र्भगवत्पादयोर्मूलं शरणमभिप्रपन्न इति । तस्यास्तु जननी उदञ्चि-पलितशारशिखण्डबन्धस्पृष्टमुक्तभूमिरभाषत । भगवन्नस्या मे दोष-मेषा वो दासी विज्ञापयति दोषश्च मम स्वाधिकारानुष्ठापनम् ।

एष हि गणिकामातुरधिकारः दुहितुर्जन्मनः प्रभृत्येवाङ्गक्रिया, तेजोबलवर्णमेधासंवर्द्धनेन दोषाग्निधातुसाम्यकृता मितेनाहारेण

शरीरपोषणम्, आपञ्चमाद्वर्षात्पितुरप्यनतिदर्शनम्, जन्मदिने पुण्य
दिनेषु च उत्सवोत्तरो मङ्गलविधिः, अध्यापनमनङ्गविद्यानां साङ्गा
नाम्, नृत्यगीतवाद्यनाट्यचित्रास्वाद्यगन्धपुष्पकलासु लिपिज्ञानवचन
कौशलादिषु च सम्यग्विनयनम्, शब्दहेतुसमयविद्यासु वार्त्तामात्राव
बोधनम्, आजीवज्ञाने क्रीडाकौशले सजीवनिर्जीवासु च द्यूतकलासु
अभ्यन्तरीकरणम्, अभ्यन्तरकलासु वैश्वासिकजनात्प्रयत्नेन प्रयोग
ग्रहणम्, यात्रोत्सवादिष्वादरप्रसाधितायाः स्फीतपरिबर्हायाः प्र-
काशनम्, प्रसङ्गवत्यां सङ्गीतादिक्रियायां पूर्वसंगृहीतैर्ग्राह्यवाग्भिः
सिद्धिलम्भनम्, दिक्षु तेषु तत्तच्छिल्पवित्तकैर्यशःप्रख्यापनम्, कार्त्ता
न्तिकादिभिः कल्याणलक्षणोद्घोषणम्, पीठमर्दविटविदूषकैर्भिक्षुक्या
दिभिश्च नागरिकपुरुषसमवायेषु रूपशीलशिल्पसौन्दर्यमाधुर्यप्र-
स्तावना, युवजनमनोरथलक्ष्यभूतायाः प्रभूततमेन शुल्केनावस्थापनम्,
स्वतो रागान्धाय तद्भावदर्शनोन्मादिताय वा जातिरूपवयोऽर्थशक्ति
शौचत्यागदाक्ष्यदाक्षिण्यशिल्पशीलमाधुर्योपपन्नाय स्वतन्त्राय प्रदानम्,
अधिकगुणायास्वतन्त्राय प्राज्ञतमायाल्पेनापि बहुव्यपदेशेनार्पणम्,
अस्वतन्त्रेण वा गान्धर्वसमागमेन तद्गुरुभ्यः शुल्कापहरणम्, अलाभे
ऽर्थस्य कामस्वीकृते स्वामिन्यधिकरणे वा साधनम्, रक्तस्य दुहि
त्रैकचारिणीव्रतानुष्ठापनम्, नित्यनैमित्तिकप्रीतिदायकतया हृतशि-
ष्टानां गम्यधनानां चित्रैरुपायैरपहरणम्, अददता लुब्धप्रायेण च
विगृह्यासनम्, प्रतिहस्तिप्रोत्साहनेन लुब्धस्य रागिणस्त्यागशक्तिसन्धु
क्षणम्, असारस्य वाक्सन्तक्षणैर्लोकोपक्रोशनैर्दुहितृनिरोधनैर्व्री-
डोत्पादनैरन्याभियोगैरवमानैश्चापवाहनम्, अर्थदैरनर्थप्रतिघातिभि
श्चानिन्द्यैरन्यैरनुबद्धार्थानर्थसंशयान्विचार्य भूयो भूयः संयोजनमिति।

गणिकायाश्च गम्यं प्रति सज्जैव न सङ्गः सत्यामपि प्रीतौ न
मातुर्मातृकाया वा शासनातिवृत्तिः। एवं स्थिते अनया प्रजापति
विहितं स्वधर्ममुल्लङ्घ्य क्वचिदागन्तुके रूपमात्रधने विप्रयूनि स्वैरेव

धनक्षयेन रममाणया मासमात्रमत्यवाहि। मम जनश्च भूयानयं योग्यः प्रत्याचक्षमाणयाऽनया प्रकोपितः स्वकुटुम्बस्य चावसादितम्। यथा कुमतिर्मे नश्यतीति निवारयन्त्या मयि वनवासाय कोपात् प्रस्थिता। सा चेदियमप्रार्थ्यनिश्चया सर्व एव जनोऽत्रैवानन्यगतिरनशनेन संस्थास्यत इत्यरोदीत्।

अथ सा वारयुवतिस्तेन तापसेन भद्रे ननु दुःखाकरोऽयं वनवासः तस्य फलमपवर्गः स्वर्गो वा प्रथमस्तु तयोः प्रकृष्टज्ञानसाध्यः प्रायो दुःसम्पाद एव द्वितीयस्तु सर्वस्यैव सुलभः कुलधर्मानुष्ठायिनः तदशक्यारम्भादुपरम्य मातुर्मते वर्त्तस्वेति सानुकम्पमभिहिता यदीह भगवत्पादमूलं न शरणं शरणमस्तु मम कृपणाया हिरण्यरेता देव एवेत्युदमनायत। स तु मुनिरनुविमृश्य गणिकामातरमवदत् सम्प्रति गच्छ प्रत्यहान् प्रतीक्षस्व कानिचिद्दिनानि यावदियं सुकुमारा सुखोपभोगसमुचिता सत्यरण्यवासक्लेशेनोद्वेजिता भूयो भूयश्चास्माभिर्विबोध्यमाना प्रकृतावेव स्थास्यतीति। तथेति तस्याः प्रतियाते स्वजने सा गणिका तं विमलधुभक्तिर्धौतोद्गमनीयवासिनी नात्यादृतशरीरसंस्कारा वनतरुपोतकालवालपूरणैर्देवतार्चनकुसुमोच्चयावचयप्रयासैर्नैकविकल्पोपहारकर्मभिः कामशास्त्रार्थे च गन्धमाल्यधूपदीपनृत्यगीतवाद्यादिभिः क्रियाभिरेकान्ते च त्रिवर्गसम्बन्धिनीभिः कथाभिरध्यात्मवादैश्चानुरूपैरचिरेणैव कालेनान्वरञ्जयत्।

एकदा च रहसि रक्तं तमुपलक्ष्य मूढः खलु लोको यस्तु धर्मार्थकामावपि गणयतीति किञ्चिदहसत्। कथय तावत् केनांशेनार्थकामातिशायी धर्मस्तवाभिप्रेत इति प्रेरिता मरीचिना लज्जामन्थरमारभताभिधातुम्। इतः किल जनाद्भगवतस्त्रिवर्गबलाबलज्ञानम्। अथवैतदपि प्रकारान्तरं दासजनानुग्रहस्य। भवतु श्रूयताम्। ननु धर्मादृतेऽर्थकामयोरनुत्पत्तिरेव तदनपेक्ष एव स धर्मो निवृत्तिसुख

प्रभृति चेतसः समाधानमात्रसाध्यश्च सोऽर्थकामवद्वाह्यसाधनेषु नास्थायतते। तत्त्वदर्शनोपबृंहितश्च यथाकथञ्चिदप्यनुष्ठीयमानाभ्यां नार्थकामाभ्यां बाध्यते बाधितोऽपि चाल्पायासप्रतिसमाहितस्तमपि दोषं निर्हृत्य श्रेयसेऽप्यनल्पाय कल्पते। तथाहि पितामहस्य तिलोत्तमाभिलाषः भवानीपतेर्मुनिपत्नीसहस्रसन्दूषणं पद्मनाभस्य षोड़शसहस्रान्तःपुरविहारः प्रजापतेः स्वदुहितर्यपि प्रणयप्रवृत्तिः शचीपतेरहल्याजारता शशाङ्कस्य गुरुतल्पगमनम् अंशुमालिनो वड़वालङ्घनम् अनिलस्य केसरिकलत्रसमागमः बृहस्पतेरुतथ्यस्य भार्याभिसरणं पराशरस्य दासकन्यादूषणं पाराशर्यस्य भ्रातृदारसङ्गतिः अत्रेर्मृगीसमागमइति। अमराणाञ्च तेषु तेषु कार्य्येषु आसुरविप्रलम्भनानि ज्ञानबलान्न धर्म्मपीड़ामावहन्ति। धर्म्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते तन्मन्ये नार्थकामौ धर्म्मस्य शततमीमपि कलां स्पृशतइति।

श्रुत्वैतदृषिरुदीर्णरागवृत्तिरभ्यधात् अयि विलासिनि साधु पश्यसि न धर्म्मस्तत्त्वदर्शिनां विषयोपभोगेनोपरुध्यतइति। किन्तु जन्मनः प्रभृति अर्थकामवार्त्तानभिज्ञा वयं श्रोतुमिच्छामः किंरूपौ किंपरिवारौ किंफलौ चेति। साब्रवीत् अर्थस्तावदर्ज्जनवर्द्धनरक्षणात्मकः कृषिपाशुपाल्यवाणिज्यसन्धिविग्रहादिपरिवारस्तीर्थप्रतिपादनफलश्च। कामस्तु विषयातिसक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुखस्पर्शविशेषः। परिवारस्त्वस्य यावदिह रम्यमुज्ज्वलञ्च। फलं पुनः परमाह्लादनं परस्परविमर्द्दजन्म स्मर्य्यमाणमधुरमुदीरिताभिमानमनुत्तमं सुखमपरोक्षं स्वसंवेद्यमेव। तस्यैव कृते विशिष्टस्थानवर्त्तिनः कष्टानि तपांसि महान्ति दानानि दारुणानि युद्धानि भीमानि समुद्रलङ्घनानि मानवाः समाचरन्तीति। निशम्यैतत् नियतिबलात् तत्पाटवात् स्वबुद्धिमान्द्यात् संयमनमनादृत्य तस्यामसौ प्रासजत्।

सा सुदूरं मूढात्मानं तं प्रवहणेन नीत्वा पुरम् उदारशोभया राजवीथ्या स्वभवनमनैषीत्। अभूच्च घोषणा श्वः कामोत्सव इति। उत्तरेद्युः स्नातानुलिप्तमारचितमङ्गमाल्यम् आरब्धकामिजनवृत्तं निवृत्ततपश्चरणाभिलाषं स्वभावमापन्नतेऽपि तया विना दूयमानचित्तं तमृषिमृद्धिमता राजमार्गेणोत्सवसमाजं नीत्वा क्वचिदुपवनोद्देशे युवतिजनशतपरिवृतस्य राज्ञः सन्निधौ स्मितमुखेन तेन भद्रे भगवता सह निषीदेत्यादिष्टा सविभ्रमकृतप्रणामा सस्मितं न्यषीदत्।

तत्र काचिदुत्थाय बद्धाञ्जलिरुत्तमाङ्गना देव जितानयाहमस्यै दास्यमद्यप्रभृत्यभ्युपेतं मयेति प्रभुं प्राणंसीत्। विस्मयहर्षमूलश्च कोलाहलो लोकस्योदजिहीत। हृष्टेन च राज्ञा महार्हैरलङ्कारैर्महता च परिबर्हेणानुगृह्य विसृष्टा वारमुख्याभिः पौरमुख्यैश्च गणशः प्रशस्यमाना स्वभवनमगत्वैव तमृषिमभाषत भगवन्नयमञ्जलिश्चिरमनुगृहीतोऽयं दासजनः स्वार्थमिदानीमनुष्ठेय इति। स तु रागादशनिहत इवोद्भ्राम्याब्रवीत् प्रिये किमेतत् कुत इदमौदासीन्यं क्व गत स्तव मय्यसाधारणोऽनुराग इति। अथ सा सस्मितमवादीत् भगवन् यया अद्य राजकुले मत्तः पराजयोऽभ्युपेतस्तस्याश्च मम च कस्मिंश्चित् संघर्षे मरीचिमावर्जितवतीव श्लाघस इति तयास्म्यहमधिक्षिप्ता दास्यपणबन्धेन चास्मिन्नर्थे प्रावर्त्तिषि सिद्धार्था चास्मि त्वत्प्रसादादिति। स तया तथावधूतो दुर्मतिः कृतानुशयः शून्यवन्न्यवर्त्तिष्ट। यस्तयैवं कृतस्तपस्वी तमेव मां महाभाग मन्यस्व। स्वनिमित्तं रागमुत्पाद्य तयैव बन्धक्या मद्वैराग्यमर्पितम्। अचिरादेव प्रक्ष्य आत्मा त्वदर्थसाधनक्षमः कर्त्तुम्। अस्यामेव तावदसावङ्गपुर्यां चम्पायामिति।

अथ तन्मनःक्षततमःस्पर्शभियेवास्तं रविरगात्। स्फटिमुक्तश्च रागः सन्ध्यात्मनास्फुरत्। तत्कथादत्तवैराग्याणीव कमलवनानि समकुचन्। अनुमतमुनिशासनश्चाहममुनैव सहोपास्य सन्ध्याम् अनुरूपाभिः कथाभिस्तमनुशय्य नीतरात्रिः प्रत्युष्णिमसमुदयप्रत्युद्दाव

कस्ये कस्यचमविश्रब्धतयावधीरितकामार्गोऽपि तं जनमनुसृत्य नगराकेद-चलम् अदर्शं च मार्गाभ्यासवर्त्तिनः कस्यापि क्षपणकविहारस्य बहिर्विविक्ते रक्ताशोकषण्डे निषण्णम् अस्पष्टसमाधिम् आधिक्षीणम् अपरागम् अनभिरूपाकारं क्षपणकं कमपि क्षपणकम्। उरसि चास्य शिथिलितमलनिचयाम् मुखान्निपततोऽश्रुबिन्दूनलक्षयम् अप्राक्षं चान्तिकोपविष्टः क्व तपः क्व च रुदितं न चेद्रहस्यमिच्छामि श्रोतुं शोकहेतुमिति। सोऽब्रवीत् सौम्य श्रूयताम् अहमस्यामेव चम्पायां निधिपालितनाम्नः श्रेष्ठिनो ज्येष्ठसूनुर्वसुपालितो नाम। वैरूप्यात्तु मम विरूपक इति प्रसिद्धिरासीत्। अन्यश्चात्र सुन्दरक इति यथार्थनामा कलागुणैः सम्पन्नो वसुना नातिपुष्टोऽभवत्। तस्य च मम च वपुर्वसुनी निमित्तीकृत्य वैरं वैरोपजीविभिः पौरधूर्त्तैरुदपाद्यत। तएव कदाचिदावयोरुत्सवसमाजे स्वयमुत्पादितमन्योन्यावमानमूलमधिक्षेपवचनव्यतिकरमुपशमय्य न वपुर्वसु वा पुंस्त्वमूलमपि तु प्रकृष्टगणिकाप्रार्थ्यं यौवनो हि यः स पुमान् अतोऽद्य वसतिललामभूता काममञ्जरी यं वा कामयते स हरतु सुभगपताकामिति व्यवास्थापयन्।

अभ्युपेत्यावां प्राहिणुव तस्यै दूतान्। अहमेव किलाऽमुष्याः स्मरोन्मादहेतुरासम्। आसीनयोश्चावयोर्मामेवोपगम्य सा नीलोत्पलमयमिवापाङ्गदामाङ्गे मम मुञ्चन्ती तं जनमपत्रपयाऽधोमुखं व्यधत्त। सुभगेन च मया सधनस्य सगर्वस्य सनयस्य सदेहस्य सजीवितस्य च सैवेश्वरी कृता। कृतश्चाहमनया मन्मथक्रमेण हृतसर्वस्वतया चापवाहितः प्रपद्य लोकोपहासलक्ष्यतामक्षमश्च सोढुं धिक्कृतानि पौरवृद्धानाम् इह जैनायतने मुनिनैकेनोपदिष्टमोक्षवर्त्मा सुकर एष वेषो वेश्याविनिर्गतानामित्युदीर्णवैराग्यस्तदपि कौपीनमग्रहम्। अथ पुनः प्रवीर्णमलपङ्कः प्रबलकेशलुञ्चनव्यथः प्रकृष्टतमक्षुत्पिपासादिदुःखस्थानासनशयनभोजनेष्वपि द्विप इव नवग्रहो वन्धवतीभिर्यातनाभिरुद्वेजितः प्रत्यवाक्रमम्। अहमस्मि द्विजातिरधर्म्मा

ममैव पावित्र्यपथावतारः श्रुतिस्मृतिविहितेनैव कर्म्मणा मम पूर्वजाः प्रावर्त्तन्त । मम तु मन्दभाग्यस्य निर्वेदम् अमन्ददुःखायतनं हरिहरहिरण्यगर्भादिदेवतापवादवचनैरन्यथान्यथापि निरयपथम् अपथं विप्रलम्भप्रायम् ईदृशमिदमधर्म्मवर्त्म धर्म्मवत्समाचरतीव मासीदिति प्रत्याकलिततद्दर्शनः पिण्डीचक्रं विविक्तमेतदासाद्य पर्य्याप्तमश्रु मुञ्चामीति ।

श्रुत्वा चैतदनुकम्पमानोऽहमवं भद्र क्षमस्व कञ्चित्कालम् अत्रैव निवस निर्जने युक्ते नासावेव वेश्या यथा त्वां योजयिष्यति तथा यतिष्ये सन्त्युपायास्तादृशा इत्याश्वास्य तम् उत्थितोऽहं नगरमाविशन्नेव चोपलभ्य लोकवादाल्लुब्धसमृद्धपूर्णं पुरमिति अर्थानां नश्वरत्वम् प्रदर्श्य प्रकृतिस्थानमुन् विधास्यन् कर्णिसुतप्रहिते पथि मतिमकरवम् । अनुप्रविश्य च द्यूतसभामक्षधूर्त्तैः समगंसि । तेषां पञ्चविंशति प्रकारासु सर्व्वासु द्यूताश्रयासु कलासु कौशलम् अक्षभूमिहस्तादिषु चात्यन्तदुरुपलक्ष्याणि कूटकर्म्माणि तन्मूलानि सावलेपान्यधिक्षेप वचनानि जीवितनिरपेक्षाणि संरम्भविचेष्टितानि सभिकप्रत्ययव्यवहारान् न्यायबलप्रतापप्रायान् प्रयोजितार्थसाधनक्रमान् वणिक्सान्त्वनानि दुर्बलेषु भर्त्सनानि पक्षरचनानैपुणमुच्चावचान्युपप्रलोभनानि ग्लहप्रभेदवर्णनानि द्रव्यसंविभागौदार्य्यम् [illegible]न्तरा अश्लीलप्रायाम् कलकलानित्येतानि चान्यानि चानुभवन् न तृप्तिमध्यगच्छम् अथ सच किञ्चित् प्रमादद्दत्तशारिके कश्चिच्छितवे । प्रतिकितवस्तु निर्दयमिव क्रोधताम्रया दृशा मामभिवीक्ष्य "शिक्षयसि रे धूर्त्तमं हासव्याजेन आस्तामयमशिक्षितो वराकस्त्वयैव तावच्छिक्षितेन देविष्यामीति" द्यूताध्यक्षानुमत्या अदीव्यत् । मया जितश्चासौ षोडश सहस्राणि दीनाराणाम् । तदर्द्धं सभिकाय सभ्येभ्यश्च दत्त्वा अर्द्धं स्वीकृत्योदतिष्ठम् । उदतिष्ठंश्च तत्र गतानां हर्षगर्भाः प्रशंसालापाः । प्रार्थनमानसभिकानुरोधाच्च तद्गारेऽभ्युदारमभ्यवहारविधिमन-

रणम्। अमुनैव च मे दुरोदरावतारः स मे विमर्दको नाम विश्वासस्थानं द्वितीयं हृदयमासीत्।

तन्मुखेन च ज्ञाततः कर्मतः प्रीतश्च सकलमेव नगरमवधार्य्य धूर्जटिकण्ठकल्माषकालतमसि नीलनिवसनार्धोरुकपरिहितो बद्धतीक्ष्णकौक्षेयकः फणिमुखकाकली सन्दंशक पुरुषशीर्षक योगचूर्ण योगवर्त्तिका मानसूत्र कर्कटक रज्जु दीपभाजन भ्रमर करण्डकप्रभृत्यनेकोपकरणयुक्तो गत्वा कस्यचिल्लुब्धेश्वरस्य गृहे सन्धिं छित्वा पटच्चरसूक्ष्मच्छिद्रालक्षितान्तर्गृहप्रवृत्तिरक्षयो निजगृहमिवानुप्रविश्य नीवीं सारवतीमादाय निरगाम्। नीलनीरदनिकरपीवरतिमिरनिविडपीडितायां राजवीथ्यां झटिति शतह्रदासम्पातमिव क्षणमालोकमलक्षयम्। अथासौ नगरदेवतेव नगरमोषरोषिता निःसम्बाधवेलायां निःसृता सविलासा काचिदुन्मिषद्भूषणा युवतिराविरासीत्। क्वासि वासु क्व यासीति सदयमुक्ता भयगद्गदमवादीत्। आर्य्य पुर्य्यस्यामर्य्यवर्य्यः कुबेरदत्तनामा वसति अस्म्यहं तस्य कन्या। मां जातमात्रां धनमित्रनाम्ने अपत्यायैव कस्मैचिदिभ्यकुमारायाभ्यजानाद्धार्थी मे पिता। स पुनरमुष्मिन्नत्युदारतया पित्रोरन्ते वित्तैर्निजैः प्रीत्यैवार्थिवर्गाद्दारिद्र्यं दरिद्रति सति अथ उदारक इति च प्रीतलोकाधिरोपितापराख्यनामनि वरयत्येव तस्मिन् मां तद्वशीभूताम् अथ गरीयसे च अर्थपतिनाम्ने कस्मैचिदितरस्मै यथार्थनाम्ने सार्थवाहाय दित्सति मे पिता। तदमङ्गलमद्य किल प्रभाते भावीति ज्ञात्वा प्रागेव प्रियतमदत्तसङ्केता वञ्चितस्वजना निर्गत्य बाल्याभ्यस्तेन वर्त्मना मन्मथैकाभिसारा तदगारमभिसरामि। तन्मां मुष गृहाणेदं भाण्डमित्युन्मुच्य मह्यमर्पितवती। दयमानश्चाहमब्रुवम् "एहि साध्वि त्वां नयेयं तं प्रियतमम्" इति चतुराणि पदान्यचलम्। आपतच्च दीपिकालोकपरिलुप्यमानतिमिरभारं यष्टिकृपाणपाणि नागरिकबलम्। प्रवेपमानां चाबलामवदं भद्रे माभैषीः। अस्त्ययम् असि

द्वितीयो मे नाथः । अपि तु त्वदुदयमुपायस्त्वदपेक्षया चिन्तितः श्वोऽयं भावितविषवेगविक्रियः त्वयाप्यमी वाच्याः निशि वयमिमां पुरीं प्रविष्टाः दष्टश्च ममैव नायको दर्वीकरेणामुष्मिन् सभाकोणे यदि वः कश्चिन्मन्त्रविद्भूपालः स एनमुज्जीवयन्मम प्राणानाहरेदनाथाया इति । सापि बाला गत्यन्तराभावात् भयगद्गदस्वरा बाष्पदुर्दिनाक्षी बद्धवेपथुः कथंकथमपि गत्वा मदुक्तमन्वतिष्ठत् अशयिषि चाहं भावितविषविक्रियः । तेषु कश्चिन्नरेन्द्राभिमानी मां निर्व्वर्ण्य मुद्रातन्त्रमन्त्रध्यानादिभिश्च उपक्रम्याकृतार्थः “ गतएवायं कालदष्टः तथाहि स्तब्धश्यावमङ्गं रुद्धा दृष्टिः प्रान्तएवोष्मा मुक्ता अलं वामुष्मोऽभिसात् करिष्यामः कोऽतिवर्तते दैवम् ” इति सहचरैः प्रायात् । उत्थितश्चाहम् उदारकाय तां नीत्वा अब्रुवम् । अहमस्मि कोपि तस्करः त्वद्गतेनैव चेतसा सहायभूतेन त्वामिमामभिसरन्तीमन्तरोपलभ्य कृपया त्वत्समीपमुपानैषम् भूषणमिदमस्या इत्यंशुपटलपाटितध्वान्तजालं तदर्पितवान् ।

उदारकस्तु तदादाय सलज्जश्च सहर्षश्च ससम्भ्रमश्च मामभाषत । आर्य्य त्वयैवेयमस्यां निशि प्रिया मे दत्ता वाक् पुनर्ममापहृता तथापि न जाने वक्तुम् । त्वत्कर्म्मैतदद्भुतमिति न ते स्वभावमद्भुतवत्प्रतिभाति, नैवमन्येनापि कृतपूर्व्वमिति प्रतिनियतैव वस्तुशक्तिः नहि त्वय्यन्यदीया लोभादयः, त्वयाद्य साधुतोन्मीलितेति तत्रायत्तपूर्व्वावदानेभ्यो न रोचते, दृष्टमिदानीमौदार्य्यस्य स्वरूपमिति त्वदाश्रयमननुमान्य न युक्तो निश्चयः, त्वयामुना सुकृतेन क्रीतोऽयं दासजन इति असारमतिगरीयसा क्रीतासीति स ते प्रत्याधिक्षेपः, प्रियादानस्य प्रतिदानमिदं शरीरमिति तदलाभे निधनोन्मुखमिदमपि त्वयैव दत्तम्, अथवैतावदत्र प्राप्तरूपम् अद्य प्रभृति भर्त्तव्योऽयं दासजन इति ममपादयोरपतत ।

उत्थाप्य चैनमुरसोपश्लिष्य अभाषिषि भद्र कोद्य ते प्रतिपत्ति

रिति। सोऽभ्यधत्त न शक्नोमि चैनामन्य पित्रोरनभ्यनुज्ञयोपयम्य जीवितुम् अतोऽस्यामेव यामिन्यां देशमिमं जिहासामि कोवा अहं यथा त्वमाज्ञापयसीति। अथ मयोक्तम् अस्त्वेतत् स्वदेशोदेशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य किन्तु बालेयमनल्पसौकुमार्य्या अदृष्टाः प्रत्यवायभूयिष्ठाश्च कान्तारपथाः शैथिल्यमिव किञ्चित् प्रज्ञासत्वयोरनर्थेन दृष्टेन देशत्यागेन सम्भाव्यते। तत् सहानया सुखमिहैव वस्तव्यम् एहि नयावैनां स्वमेवावासमिति। अविचारानुमतेन तेन सार्धमेनां तद्गृहमुपनीय तथैवापसर्पभूतया तत्र महाद्रव्यावशेषमचोरयाव। ततो निष्पत्य कञ्चिन्मुखवितर्कं निधाय समुपसन्तो नागरिकपुरुषसम्पाते मार्गपार्श्वशायिनं कञ्चिन्मत्तवारणमुपरि पृष्ठमाक्रम्याधारोहाव। शैवेयप्रीतपादयुगलेन च मयोत्थाप्यमानएव पतिताधोरणपृष्ठलोरःस्थलपरिगतः पुरीतल्लतापरीतदन्तकाण्डः स रक्षिकगणमभिजघ्नात्। अध्वंसयाव चामुनैवार्थपतिभवनम्। अपवाह्य च क्वचन जीर्णोद्याने शाखायामाश्रितया चावातराव। स्वगृहगतौ च जातौ शयनमध्यशिश्रयाव।

तावदेवोदगादुदधेः उदयाचलेन्द्रपद्मरागभङ्गकान्तं कल्पद्रुमहेमपल्लवापीडपाटलं पतङ्गमण्डलम्। उत्थाय च धौतवक्त्रौ प्रगेतनमङ्गलान्यनुष्ठाय अश्रान्तध्वनितुमुलं पुरमनुविचरन्तावभ्रमाव वरवधूगृहेषु कोलाहलम्। अथार्थैरर्थपतिः कुबेरदत्तमाश्वास्य कुलपालिकाविवाहं मासावधिकमकल्पयत्। उपह्वरे पुनरित्यभिहितं धनमित्रम् उपतिष्ठ सखे एकान्तेऽत्र चर्मरत्नभस्त्रिकामिमां पुरस्कृत्य अङ्गराजम् आचक्ष्व च जानात्येव देवो नैककोटिसारस्य वसुमित्रस्य मां धनमित्रं नामैकपुत्रं सोऽहं मूलहरत्वमेत्य अर्थिवर्गादस्यवजातो मदर्थमेव संवर्द्धितायां कुलपालिकायां महादारिद्र्यदोषात्पुनः कुबेरदत्तेन दुहितार्थपतये दित्सितायाम् उद्वेगादुज्झितुमसून् अपवेशितो जरण्यमवगाह्य वल्कलमाक्षिकः केनापि जटाधरेण

नितान्तमनुतप्तः किं ते साहसस्य मूलमिति। मयोक्तम् आर्य सोदर्यं दारिद्र्यमिति। स पुनरेवं कृपालुरन्वयुङ्क्त तात मूढोऽसि नान्यस्यापिष्ठितममात्मन्यामात् आत्मानमात्मनानवसादै- वोद्धरन्ति सन्तः। सन्त्युपाया धनार्जनस्य बहवः नैकोऽपि चिन्त्य कष्टप्रतिसन्धानपूर्व्वस्य प्राणलाभस्य किमनेन सोऽस्म्यहं मन्त्रसिद्धः साधितेयं मयाद्य हिमवति चर्म्मरत्नभस्त्रिका चिरमनया मयास्याः प्रसादात् कामरूपेषु कामप्रदः प्रजानामवाप्तं मया दिव्यं अटसि भूमिस्वर्ग मध्यदेशे प्रवेष्टुमागतः तामिमां प्रतिगृहाण मदन्यच नेयं वणिग्भ्यो वारमुख्याभ्यो वा दुग्धे इति हि तद्गुता प्रतीतिः। किन्तु यत्प्रकाशाद- न्यायापहृतं तस्मै प्रत्यर्पणीयं न्यायार्जितन्तु देवताब्राह्मणेभ्यस्त्याज्यम् अथैव देवतेव शुचौ देशे निवेश्यार्च्यमाना प्रातः प्रातः सुवर्णपूर्णैव दृश्यते स एव कल्प इति बद्धाञ्जलये मह्यमेनां दत्त्वा किमपि याव- त्किञ्चिदप्राविशत्। इयञ्च रत्नभूता चर्म्मभस्त्रिका देवायानिवेद्य नोपजीव्या इत्यानीता परन्तु देवः प्रमाणमिति,,। राजा च नियत मेवं वक्ष्यति भद्र प्रीतोऽस्मि गच्छ यथेष्टमेनामुपभुङ्क्ष्वेति। भूयश्च ब्रूहि यथा न कश्चिदेनां मुष्णाति तथानुगृह्यतामिति। तदप्यवश्य- मसावभ्युपेष्यति। ततः स्वगृहमेत्य यथोक्तमर्थ्यामां कृत्वा दिने दिने वरिवस्यमानां कोशलम्भैरर्थैर्नवनवैरापूर्य्य प्राकृतलोकाय दर्शयिष्यसि ततः कुबेरदत्तस्तु नाममात्रार्थपतिमर्थलुब्धः कन्यकया स्वयमेव त्वामुप स्थास्यति। अथ कुपितोऽर्थपतिश्च बहु कृतं मयं गर्व्वादभियोक्ष्यते तत्र भयचिन्तनोपायैः कौपीनावशेषं करिष्यावः। एवञ्च चौर्य्यमनेनैवाभ्यु- पायेन सुप्रच्छन्नं भविष्यतीति।

हृष्टश्च धनमित्रो यथोक्तमन्वतिष्ठत्। तदहरेव मन्त्रियोगादि- मर्दकोऽर्थपतिरेवाभियुक्तस्य दारके वैरमभ्यवर्द्धयत्। अर्थलुब्ध च कुबेरदत्तो निरस्यार्थपतिं धनमित्रायैव तनयां सानुनयं प्रादित्सत प्रव्यथ्प्राप्यार्थपतिः।

एष्वेव दिवसेषु काममञ्जर्याः स्वसा यवीयसी रागमञ्जरी नाम पञ्चवीरगोष्ठे सङ्गीतकमनुष्ठास्यतीति साक्रादरः समागमन्नागरजनः। अथाहं सह सख्या धनमित्रेण तत्र संन्यधिषि। प्रवृत्तनृत्यायाञ्च तस्यां द्वितीयरङ्गपीठं ममाभून्मनः। तद्दृष्टि-विभ्रमोत्पलवनसम्पातपात्रञ्च पञ्चशरो भावरसानां सामग्र्यात् समुदितबल इव मामतिमात्रमव्यथयत्। अथासौ नगरदेवतेव नगरमोषरोचिता लीलाकटाक्षमालाभि र्नीलोत्पलपलाश श्यामलाभि र्मामबध्नात्। मल्लोचिता च सा शिक्षिताभ्योऽभिनी किं विलासात् किमभिलाषात् किमकस्मादेव वा न जाने असकृन्मां सखीभिरप्यनुपलक्षितेनापाङ्गप्रेक्षितेन सविभ्रमारेचितभ्रूलतमभि-वीक्ष्य सापदेशञ्च किञ्चिदाविष्कृतदशनचन्द्रिकं स्मित्वा लोकलोचन मानसानुयाता प्रातिष्ठत। सोऽहं स्वगृहमेत्य दुर्निवारयोत्कण्ठया दूरीकृताहारस्पृहः शिरःशूलस्पर्शमपदिशन् विविक्ते तल्पे मुक्तै-रवयवैरशयिषि।

अतिनिपुणश्च मदनतन्त्रे मामभ्युपेत्य धनमित्रो रहस्यकथ-यत्। सखे सैव धन्या गणिकादारिका यामेवं भवन्मनोऽभिनिवि-शते। तस्याश्च मया सुलक्षिता भावप्रवृत्तिः तामप्यचिरादयमस्मरः शरशयने शाययिष्यति स्वामाभिनिवेशिनोश्च वामयत्नसाध्यः समा-गमः। किन्तु सा किल वारकन्यका गणिकास्वधर्म्मप्रतीपगामिनी भद्रोदारेणाशयेन समगिरत गुणशुल्काहं न धनशुल्का नच पाणि ग्रहणादृते अन्यभोग्यं यौवनमिति। तच भङ्गः प्रतिविध्याकृतार्था तद्भगिनी काममञ्जरी माता च माधवसेना राजानमश्रुकण्ठ्यौ व्यजिज्ञ पताम्। देव युष्मद्दासी रागमञ्जरी रूपानुरूपशीलशिल्पकौशला पूरयिष्यति मनोरथानित्यासीदस्माकमतिमहत्याशा साद्य नश्छिन्ना यदियमतिक्रम्य स्वकुलधर्म्मम् अर्थनिरपेक्षा गुणेभ्य एव स्वं यौवनं विचिक्रीषते कुलस्त्रीवृत्तमेवाभ्यस्तमनुतिष्ठासति सा चेदिदं देवपादा

यथापि तावत्कल्पितमायव्ययेन तदा योऽर्थं भवेदिति। रागाच तस्तु दोषाच्चधारिणिच्छा तथाप्यनारब्धैव सा तदासीत् तदाहुः तथा माता च यदि निर्बन्धेन राज्ञे समभिरतो यदि कश्चिद्गम्भोऽर्थादि चक्षुषा विभवं यावत् विप्रलभ्य नाशयिष्यति स तस्करवद्ध्याइति। तदेवं स्थिते धनाढ्ये न तत्सङ्गमोऽनुमन्यते ननु धनदायासावभ्युप-गच्छतीति विचिन्त्योऽन्यः अभ्युपायइति।

अथ मयोक्तं किमत्र चिन्त्यं गुणोत्साभावर्ज्यं मूढमर्थैरस्तु अ-लोभयावइति। ततश्च काचित्कामञ्जर्याः प्रधानदूती धर्मरक्षिता नाम शाक्यभिक्षुकी चीवरपिण्डदानादिनोपसंगृह्य तन्मुखेन तथा बन्धक्या पणबन्धमकारयम् "अजिनरत्नमुदारकाम्भुषित्वा मया तुभ्यं देयं यदि प्रतिदानं रागमञ्जरीति"। सोऽहं प्रतिपन्नायाञ्च तस्यां तथा तमर्थं सम्पाद्य मङ्गलोन्मादितया रागमञ्जर्याः करमिम ग्रहणमग्रहीषम्। यस्याञ्च निशि धर्म्मरक्षयैवादस्तस्याः प्रारम्भे कार्यान्तरापदेशेन समाहूतेषु पूर्णपत्रेष्वेव नागरमुख्येषु मत्स्रनिधि विमर्दकोऽर्थपतिरष्टौ नाम भूत्वा धनमित्रमुपक्रम्य बहुतर्जयत्। उक्तश्च धनमित्रेण भद्र कस्तवापराधः यत्परस्य चेतो मामाक्रोशसि न स्मरामि स्वल्पमपि तवापकारं मत्कृतमिति। स भूयोऽपि सर्व्वं तर्जयन्निवा ब्रवीत् स एष धनगर्वोनाम यत्परस्य भार्यां शुल्कक्रीतां पुनस्तत्-पितरौ द्रव्येण विलोभ्य स्वीचिकीर्षसि ब्रवीषि च कस्तवापकारो मत्-कृतइति। ननु प्रतीतमेवैतत् सार्थवाहस्यार्थपतेर्विमर्दको द्वितीयः प्राणाइति सोऽहं तत्कृते प्राणानपि परित्यजामि ब्रह्महत्यामपि न परिहरामि ममैकरात्रावगारप्रतीकारक्षणेव धर्म्मरक्षानगरदाह-न्यरइति। तथा ब्रुवाणश्च पौरमुख्यैः सामर्षं निर्भर्त्स्यापवाहितो गतोऽभूत्।

इयञ्च वार्त्ता कामिमार्त्तिंना धनमित्रेण धर्म्मरक्षानाम्नमादायोप-स्थाप्य पार्थिवाय निवेदिता। स चार्थपतिमाहूयोपह्वरे पृष्टवान्

अद्य त्विमस्ति कश्चिद्विमर्दको नामाप्यभवदिति। तेन च मूढ़ात्मना अस्ति देव परं मित्रं कथ तेनार्थइति कथिते राज्ञोक्तम् अपि शक्नोषि तमाज्ञातुमिति। बाढ़मस्मि शक्तइति निर्गत्य स्वगृहे वेश्य-वाटे द्यूतसभायामापणे च निपुणमन्विष्यन्नोपलब्धवान्। कथं वोप-लभेत स वराकः स खलु विमर्दको मङ्काश्रितत्वदभिज्ञानचिह्नो मन्नियोगात् त्वदन्वेषणायोज्जयिनीं तदहरेव प्रातिष्ठत। अर्थपतिस्तु समदृष्ट्वा तत् कृतमपराधमात्मसम्बन्धीति मत्वा मोहाद्भयाद्वा प्रत्या-ख्याय पुनर्धनमित्रेण विभावितेन कुपितेन राज्ञा निगृह्य निगड-बन्धनमनीयत।

तेष्वेव दिवसेषु विधिना कल्पोक्तेन चर्म्मरत्नं दोग्धुकामा काम-मञ्जरी पूर्व्वंदुग्धं स्वपतीभूतविस्मयं रहस्युपहूय ततोऽपहृतं सर्व्व-मर्थजातं तस्मै प्रत्यर्प्य सप्रत्ययश्च बह्वनुनीय प्रत्यागमत्। सोऽपि कथञ्चिन्नियंत्रिकवृन्दमोचितात्मा मदनुशिष्टो धूर्ततमः स्वधर्म्ममेव प्रत्यपद्यत। काममञ्जर्य्यपि कतिपयैरेवाहोभिरप्रमत्तक्लेशम् अजिन-रत्नदोहाशया समभ्युदयमकरोत्। अथ मत्प्रयुक्तो धनमित्रः पार्थिवं मिथोऽवज्ञापयत् देव येयं गणिका काममञ्जरी लोभोत्कर्षात् लोभ-मञ्जरीति लोकोपक्रोशपात्रमासीत् साद्य मुग्धलोलुपाण्यपि निर-पेक्षं त्यजति तन्मन्ये सा चर्म्मरत्नलाभं हेतुं तस्य खलु अस्य पत्तादृशः वणिग्भ्यो वारमुख्याभ्यश्च वा दुग्धे नान्येभ्यइति हि तद्गता प्रतीतिः अतोऽमुष्यामस्ति मे शङ्केति।

सा सद्यएव राज्ञा सह जनन्या समाहूयत। अविलम्बेनैव मयोपह्वरे कथितं नूनमार्य्ये सर्व्वस्वमादतिप्रकाशादाशङ्कनीयचर्म्म-रत्नलाभः तदनुयोगायाक्रूरराजेन समाहूयसे भूयोभूयश्च निर्ब-न्धया त्वया नियतमस्ति तदागतिश्चेनाख्यमपदेश्यः ततश्च मे भावी चित्रवधः हते च मयि न जीविष्यत्येव ते भगिनी त्वञ्च निस्वी-भूता चर्म्मरत्नञ्च धनमित्रमेव प्रतिभजिष्यति तदियमापत् समन्ततो

ऽनर्थानुबन्धिनी तत् किमत्र प्रतिविधेयमिति। तया तज्जनन्या चा-
भूमि विस्रब्धोक्तम् अस्त्येवैतदस्य दारिद्र्याग्निभिर्भिन्नप्रायं रहस्यम्।
राजा च निर्बन्धादिभिश्चतुरमतिभिर्ज्ञत्यापि नियतमागतिरपदेश्यैव
चौरिकस्य त्वयि त्वयि त्वपदिष्टे सर्व्वमस्यात्कुटुम्बमवसीदेत्। अयं
पतो च तदयशो रूढम् अङ्गपुरप्रसिद्धश्च तस्य कीनाशस्यास्माभिः
सत्कृतम् अमुनैव तदस्मभ्यं दत्तमित्यपदिश्य वरमात्मा गोपयितुमिति
मामभ्युपगमय्य राजकुलमगमताम्।

राज्ञानुयुक्ते च नैव न्यायो वेशकुलस्य यदातुरपदेशः। नत्वार्थे
न्यायार्ज्जितैरेव पुरुषावेशमुपतिष्ठन्तीत्यसकृदतिप्रमुद्य कर्णनासा
च्छेदोपदोपभीषिताभ्यां दग्धवन्धकीभ्यां सएव तपस्वी तस्करत्वेनार्थपति
रख्यायत। कुपितेन च राज्ञा तस्य प्राणेष्वपातोद्यतः। प्राञ्जलिना
धनमित्रेणैव प्रत्यषिध्यत "आर्य्य मौर्य्यदत्तएष वरो वणिजाम् ईदृशे-
ष्वपराधेषु नास्त्यसुभिरभियोगः यदि कुपितोऽसि हृतसर्व्वस्वो
निर्व्वासनीयः पापएषइति"। तच्छ्रुत्वा च धनमित्रस्य कीर्त्तिरप्रथत
अप्रीयत च भर्त्ता। पटच्चरच्छेदशेषः अर्थपतिरर्थमत्तः सर्व्वपौर
जनसमक्षं निरवास्यत। तद्व्यागान्तु केनचिदवयवेन सा वराकी
काममञ्जरी चर्म्मरत्नभस्त्रिकावपिद्धसर्व्वस्वा सानुकम्पं धनमित्रा-
भिचोदितेन भूपेनाभ्यवपद्यत। धनमित्रश्चाहनि गुणिनि कुलपालि
कामुपायंस्त।

तदेवं सिद्धसङ्कल्पो रागमञ्जरीसद्म हेमरत्नपूर्णमकरवम्।
अस्मिंश्च पुरे लुब्धसमृद्धवर्गस्तथा मुषितः यथा कपालपाणिः सैरेव
धनैर्म्मद्विश्राणितैः सम्पन्नीकृतस्यार्थिवर्गस्य गृहेषु भिक्षार्थमभ्रमत्।

नह्यनुमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुं
यतोऽहमेकदा रागमञ्जर्य्याः प्रणयकोपप्रशमनाय सानुनयं पायि-
तायाः पुनःपुनः प्रणयसमर्पितमुखमधुगण्डूषम् आस्वादमास्वादं मदे
नास्पृश्ये। क्षीबं हि मदोन्मादयोरमार्गेऽप्युचितकर्म्मस्येव प्रवर्त्तनम्।

यदहमुपोढमदो। नगरमिदमेकयैव शर्व्वर्य्या निर्धनीकृत्य त्वद्भवनं पूरयेयमिति प्रत्यायितप्रियतमाप्रणामाञ्जलिप्रणयवनितावर्गो मत्त वारणइव रभसच्छिन्नशृङ्खलः कयापि धात्र्या प्रमादलिखितान्वयानु- गम्यमानो नातिपरिकरोऽसिद्वितीयो रंहसा परवेश्मोदचलम्। अभि पततोपि नागरिकपुरुषानग्रहीनेवावगाह्य तस्कर इति तैरभिहन्य- मानोऽपि नातिकुपितः क्रीडन्निव मदावसन्नहस्तपातितेन निस्त्रिंशेन छिन्नानेव हत्वा अवघूर्णमानताम्रदृष्टिरपतम्। अनन्तरमात्तरवा- न्निःसरन्ती प्रव्राजिका ममाभ्यासमगमत् अवध्ये पाशमरिभिः। आपदा तु मदापहारिण्या सद्यएव बोधितस्तत्तमोपजातया प्रति- भया अचीचरम्। अहो ममेयं सोन्मूला मद्व्यापदापतिता प्रकृत तरस्य सख्यं मया सह धनमित्रस्य मत्परिग्रहत्वस्य रागमञ्जर्याः मदेनसा च तौ प्रोज्झितौ श्वो नियतं निराशयिष्येते। तदियमिह प्रतिपत्तिः यथानुष्ठीयमानया मन्निरोधागतस्तौ परित्रास्येते माच कदा चिदनर्थादितश्चारयिष्यतीति कमप्युपायमात्मनैव निर्णीय प्रव्रा- जिकामस्मादियम् अपेहि जरति के या तामर्थलुब्धां दग्धगणिकां राग मञ्जरिकामजिनरत्नमत्तेन प्रभुना मे निजच्छद्मना धनमित्रेण सङ्ग- मितवती सा हतासि तस्य पापस्य चर्म्मरत्नमोषात् दुहितुश्च ते साराभरणापहारादहमद्य निःशल्यमुत्स्रक्ष्येयं जीवितमिति। सा पुन रुद्घटितधा परमधूर्त्ता सानुगद्रदमुदञ्चितस्नान् पुरुषान् सप्रणाम मासादितवती सामपूर्व्वं मम पुरस्तादपावत भद्रकाः प्रतीक्षतां कञ्चित्कालं यावदस्मादस्य दीर्घं सर्व्वं मुक्षितमर्थजातमवगच्छेयमिति। तथेति तैः प्रतिपन्ने पुनर्मत्समीपमासाद्य सौम्य क्षमस्वास्य दासीजन- स्यैकमपराधम् अस्तु स कामं त्वत्पत्न्याभिमर्शी वैरास्पदं धन मित्रः स्मरंस्तु चिरकृतां ते परिचर्यामनुग्रहीतुमर्हसि दासीं राग मञ्जरीम् आकल्पसारोऽपि रूपाजीवाजनः तद्गृहि क निहितमस्या भूषणमिति पादयोरपतत्। ततोदयमानहृदयाहमब्रुवं भवतु खलु

धूर्त्तवर्षिणः किं ममामुष्या वैरानुबन्धेनेति तद्ब्रुवन्निव कर्ण एवैनाम-शिक्षयम् एवमेवं प्रतिपत्तव्यमिति। सा तु प्रतिपन्नार्था जीव चिरं प्रसीदन्तु ते देवताः देवोऽप्यङ्गराजः प्रीतप्रीतो मोचयतु त्वाम् एतेऽपि भद्रमुखास्तव दयन्तामिति शनैरपासरत्। आनीये चाह-मारक्षिकनायकस्य शासनाच्चारकम्।

अथोत्तरेद्युरागत्य इतरः सुभगमानी सुन्दरंमन्यः पितुर-त्ययादचिराधिष्ठिताधिकारस्तारुण्यमदादगणितप्रज्ञः कान्तको नाम नागरिकः किंचिदिव भर्त्सयित्वा मामभ्यधत्त न चेद्धनमित्रस्याजिन-रत्नं प्रतिप्रयच्छसि न चेद्वा नागरिकेभ्यश्चोरितकानि प्रत्यर्पयसि द्रक्ष्यसि पारमष्टादशानां कारणानाम् अन्ते च मृत्युमुखमिति। मया तु स्मयमानेनाभिहितं सौम्य यद्यपि दद्यामाजन्मनो मुषितं धनं न त्वर्थपतिदारापहारिणः प्राणैर्मे मित्रमुखस्य धनमित्रस्य चर्म-रत्नप्रत्याशां पूरयेयम् अदश्चैव तत् अयुतमपि यातनानामनुभवेयम् इयं मे साधीयसी सन्धेति। त्रीनेव क्रमेण वर्त्तमाने सान्त्वनतर्जन-प्राये प्रतिदिनमनुयोगव्यतिकरेऽनुगुणान्नपानलाभात् कतिपयैरे-वाहोभिर्विरोपितव्रणः प्रकृतिस्थोऽहमासम्।

अथ कदाचिदच्युताम्बरपीतातपत्विषि क्षयिणि वासरे शृङ्खवर्गां शृगालिका उत्कम्पेन वेशेनोपसृत्य दूरस्थानुचरा मामुपश्लिष्या-ब्रवीत् आर्य्य दिष्ट्या वर्द्धसे फलिता तव सुनीतिः। यथा त्वयादिष्टे तथा धनमित्रमेवाब्रुवम्। आर्य्य तवैवमापन्नः सुहृदित्युवाच "अद्य मद्य वेशसंसर्गसुलभात् पानदोषाद्द्वन्द्वः त्वया पुनरविमृश्यम् अद्यैव राज्ञा विज्ञापनीयः। देव देवप्रसादादेव पुरापि तदजिनरत्नमर्थ-पतिमुषितमासादितम् अथ तु भर्त्रा रागमञ्जर्य्याः कश्चिदत्यधूर्त्तः कलासु कवित्वेषु लोकवार्त्तासु चातिवैचक्षण्यात् मया समसृज्यत तत्सम्बन्धाच्च वस्त्राभरणप्रियवादिना तद्भार्य्यां प्रतिदिनमभ्यवर्त्त तद-सौवार्द्धिरट जिह्मदृष्टाशयतया कितवः। तेन च कुपितेन हृतं तच्चर्म

रत्नम् आभरणसमुद्गकञ्च तस्याः। सतु भूपक्षेपाय श्रमणमद्भुत
नागरिकपुरुषैः आपन्नेन आमुना अनुरुध्य रुदन्त्यै रागमञ्जरी
परिचारिकायै पूर्व्वप्रणयानुवर्त्तिना तद्भाण्डनिधानोद्देशः कथितः।
ममापि चर्म्मरत्नमुपायोपक्रान्तो यदि प्रयच्छेदिह देवपादैः प्रसादः
कार्य्यं इति। तथा निवेदितश्च नरपतिरसुभिर्नामवियोज्य उपच्छन्द-
नैरेव मं ते दापयितुं प्रवर्तिष्यते तन्नः पथ्यमिति"। श्रुत्वैव च
त्वदनुभावप्रत्ययादनतिचक्षुना तेन तत्तथैव सम्पादितम्। अथाहं
तदभिज्ञानप्रत्यायितया रागमञ्जर्य्याः सकाशात् यथेप्सितानि वसूनि
लभमाना राजदुहितुरम्बालिकायाधात्रीं मातृभिर्वां त्वदादिष्टेन
मार्गेणान्वरञ्जयं तामेव च संक्रमीकृत्य रागमञ्जर्य्याम्बालिकायाः
सख्यं परमवीवृधम्। आहरन्ती च नवनवानि प्राभृतानि उपहरन्ती
कथाश्चित्राश्चित्तहारिणीः कथयन्ती तस्याः परं प्रसादपात्रमासम्।
एकदा च हर्म्यं गतायास्तस्याः स्थानस्थितमपि कर्णकुवलयं स्रस्तमिति
प्रतिसमादधती प्रमत्तेव प्रच्याव्य पुनरुत्क्षिप्य भूमेः तेन उपकन्यका
पुरं कारणेन केनापि भवनाङ्गनं प्रविष्टस्य कान्तकस्योपरि कुहर
प्रसक्तपारावतत्रासनापदेशात् प्रहसन्ती प्राहार्षम्। सोऽपि धन्य-
म्मन्यः किञ्चिदुन्मुखः स्मयमानो मत्कर्म्मप्रहासितायाः राजदुहितुर्विं
लासप्रायमाकारमात्माभिलाषमूलमिव यथा सङ्कल्पयेत्तथा मयापि
संज्ञयैव किमपि चतुरमाचेष्टितम्। आकृष्टधन्वना च मनसिजेन
विद्धः सन् दिवसकल्पेन पश्चिमातिमुग्धः कथं कथमप्यपासरत्। सा च
राजकन्यकाङ्गुलीयकमुद्रितां वासताम्बूलवरांशुकयुगलभूषणावयव-
गर्भाञ्च पेटिकां कयाचिद्बालिकया ग्राहयित्वा रागमञ्जर्य्या इति
नीत्वा कान्तकस्यागारमगाम्। अगाधे च रागसागरे मग्नो। नावमिव
मामुपलभ्य परममृष्यत। अवस्थान्तराणि च राजदुहितुः सुदारु-
णानि आवर्णयन्त्या मया स दुर्म्मतिर्दूरमुदमाद्यत। तत्प्रार्थिता
चाहं त्वत्प्रियाप्रहितमिति ममैव मुखताम्बूलोच्छिष्टानुलेपनं निर्माल्यं

मलिनांशुकच्छन्नेषूपाहरम् तदीयानि च राजकन्यार्थमित्यादाय
बन्धनमेवापाविशम्। इत्यथ सन्धुक्षितमन्मथाग्निरेकान्ते मयोपमन्त्रि-
तोऽभूत् "आर्य्य युष्मद्वाक्यान्येव तथाविसंवादीनि तथाहि मत्प्रातिवेश्यः
कश्चित्कार्त्तान्तिकः कान्तकस्य हस्ते राज्यमिदं पतिष्यति तादृशानि
तस्य लक्षणानीत्यादिशत्। तदनुरूपमेव च त्वामियं राजकन्यका
कामयते तदेकापत्यश्च राजा तया त्वां समागतमुपलभ्य कुपितोपि
दुहितुर्मरणभयान्नोत्स्रक्ष्यति प्रत्युत प्रापयिष्यत्येव यौवराज्यम्।
इत्ययमर्थोऽर्थानुबन्धी किमिति तात नारभ्यते। यदि कुमारी
पुरप्रवेशाभ्युपायं नावबुध्यसे ननु बन्धनागारभित्तेर्व्यामत्रयमन्तराल
मारामप्राकारस्य केनचित्तु ह्रस्ववर्तिकागारिकेण तावतीं सुरङ्गां
कारयित्वा प्रविष्टस्योपवनं तवोपरिष्टादक्षदायत्तैव रक्षा। रक्ष
तारोऽपि तस्याः परिजनेन रहस्यं भेत्स्यतीति।" सोऽब्रवीत् "साधु
भद्रे दर्शितम् अस्ति कश्चित्तस्करः खननकर्म्मणि सगरसुतानामिवान्य
तमः सचेल्लभ्यः सोऽनेनैतत्कर्म्म साधयिष्यतीति।" कतमोऽसौ किमिति
न लभ्यतइति मयोक्ते येन तद्वनमित्रस्य चर्म्मरत्नं मुषितमिति त्वामेव
निरदिक्षत्। "यद्येवम् यदि त्वयास्मिन् कर्म्मणि साधिते चित्रमपा-
येभ्यस्त्वामद्य मोचयिष्यामीति शपथपूर्व्वं तेन सन्धाय सिद्धेऽर्थे भूयोऽपि
निगडयित्वा योऽसौ चोरः स सर्व्वथोपक्रान्तो न तु धृष्टतमः प्रकृति
वैरत्वादजिनरत्नं दर्शयिष्यतीति राज्ञे विज्ञाप्य चित्रवधेन घातयि-
ष्यसि। तथा च सति अर्थः सिध्यति रहस्यञ्च न स्रवतीति" मयोक्ते
सोऽतिहृष्टः प्रतिपद्य मामेव त्वदुपप्रलोभने नियुज्य बहिरवस्थितः
प्राप्तरूपमितः परं चिन्त्यतामिति।

प्रीतेन च मयोक्तं मदुक्तमस्यं त्वत्प्रयत्नवाच भूयान् आनयैन-
मिति। अथानीतेनामुना मन्मोचनाय शपथः कृतः मया च रहस्या-
निर्भेदाय। विनिगडीकृतश्च स्नानभोजनविलेपनान्यनुभूय निशान्ध-
कारात् कारागृहभित्तिकोणादारभ्योरगास्येन सुरङ्गामकरवम्। अचि-

न्तयैवं च्छन्नमनसैवामुना मन्मोचनाय प्रयत्नः कृतः तदमुं हत्वापि नासत्यवाददोषेण स्पृश्ये इति । निष्पततश्च मे निगडनाय प्रसार्य्यमाणं पाशमस्य पादेनोरसि निहत्य पतितस्य तस्यैवासिधेन्वा शिरोन्यकृन्तम् । अकथयच्च प्रश्नात्मिकां भद्र भद्र कथम्भूतः कन्यापुरसन्निवेशः महानयं प्रयासो मा वृथैव भूत् अमुत्र किञ्चिच्चोरयित्वा निवर्त्तिष्य इति । तदुपदर्शितविभागश्चावगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणिप्रदीपेषु नैकक्रीडाखेदसुप्तस्य परिजनस्य मध्ये महार्हरत्नप्रत्युप्तसिंहाकारदन्तपादे हंसतूलगर्भकोमलशय्योपधानशालिनि कुसुमलवच्छुरितपर्य्यन्ते पर्य्यङ्कतले दक्षिणपादपार्ष्णिप्रदेशभागानुवेष्टितेतरचरणाग्रपृष्ठम् ईषद्विवलितमधुरगुल्फसन्धि परस्पराश्लिष्टजङ्घाकाण्डम् आकुञ्चितकोमलोभयजानु किञ्चिद्वेल्लितोरुदण्डयुगलम् अधिनितम्बसव्यमुष्टिकभुजलताग्रपेशलम् अपाश्रयान्तनिहिताकुञ्चितेतरभुजलतोत्तानतलकरकिसलयम् आभुग्नश्रोणिमण्डलम् अतिश्लिष्टचीनांशुकान्तरीयम् अनतिवलिततनुतरोदरम् अनुतरनिःश्वासारम्भकम्पमानकठोरकुचकुड्मलम् आतिरश्चीनबन्धुरशिरोधरोद्देशदृश्यमानविस्रस्ततपनीयसरपर्य्यस्तपद्मरागरुचकम् अर्द्धलग्नाधरकर्णपाशनिश्चलकुण्डलम् उपरिपरावृत्तश्रवणपाशरत्नकर्णिकाकिरणमञ्जरीपिञ्जरितविषमव्याविद्धशिथिलशिखण्डबन्धम् आत्मप्रभापटलदुर्लक्ष्यपाटलोत्तराधरबिम्बं गण्डस्थलीसंक्रान्तहस्तपल्लवदर्शितकर्णावतंसलक्ष्यम् उपरि कपोलादर्शितनिभिन्नचित्रविलासप्रभवजातिजनितविशेषकश्रियम् आमीलितलोचनेन्दीवरम् अविभ्रान्तभ्रूपताकम् उद्भिद्यमानश्रमजलपुलकभिन्नशिथिलचन्दनतिलकम् आननेन्दुसम्मुखालकलतञ्च विश्रब्धप्रसुप्ताम् अतिधवलोत्तरच्छदनिमग्नप्रायैकपार्श्वं तया चिरविलसनखेदनिश्चलां शरदम्भोधरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्यामपश्यम् ।

दृष्ट्वैव च स्फुरदनङ्गरागमवलिखितचोरयितव्यनिस्पृहकमेव तावच्चौर्य्यमायाहृदयः किंकर्त्तव्यतामूढः क्षणमतिष्ठम् । अतर्कयच्च न चेदिमां

बालमेनामनासाद्य न शक्ष्यति मां जीवितुं वसन्तबन्धुः। असङ्केतित पराक्रान्ता चेयमतिबाला आत्ममार्त्तरवेण विघ्नयान्मे मनोरथम् ततोऽहमेवाश्लीये तदियमत्र प्रतिपत्तिरिति नागदन्तलग्ननिर्यास बालुकावलम्बवर्णितं फलकमादाय मणिसमुद्गकात् वर्णवर्त्तिकामुद्धृत्य तां तथाशयानां तस्याश्च मामाबद्धाञ्जलिं चरणलग्नमालिखम्। आर्य्यां चैताम्।

त्वामयमाबद्धाञ्जलि दासजनस्तमिममर्थमर्थयते।
स्वपिहि मया सह सुरतव्यतिकरखिन्नेव मा मैवम्॥

पुनश्च करण्डकाच्च वासताम्बूलवीटिकां कर्पूरस्फुटिकां पारिजातक चोपयुज्य अलक्तकपाटलेन तद्रसेन सुधाभित्तौ चक्रवाकमिथुनं निरष्ठीवम्। अङ्गुलीयकविनिमयञ्च कृत्वा कथंकथमपि निरगाम्। सुरुङ्गया च प्रविश्य बन्धनागारं तत्र बद्धस्य नागरिकवरस्य सिंह घोषनाम्नस्तोकेष्वेव दिनेषु मित्रत्वेनोपचरितस्य एवं मया कृतस्तपस्वी कान्तकस्त्वया प्रतिभिद्य रहस्यं वध्यो मोक्ष्यस्युपदिश्य सह ग्रमालिकया निरक्रामिषम्।

अपतिपथे च समागत्य रक्षिकपुरुषैरगृह्ये अचिन्तयच्च अन-सक्षि जवेनापसर्त्तुं मनाक्स्थलैरभिः एषा पुनर्वराकी गृह्येत तदिद मत्र प्राप्तरूपमिति। तानेव चमूमभिपत्य खड्गसमर्पितकूर्परः पराङ्मुखः स्थित्वा यद्यहमस्मि तस्करः भद्रा बध्नीत मां शुद्धाकमय मधिकारेण पुनरस्या वर्षीयस्यात्यवादिषम्। सा तु तावतैव गृहीत मदभिप्राया तान् सप्रणाममभ्युपेत्य भद्रमुखा ममैष पुत्रो वायुग्रस्तः चिरचिकित्सितः पूर्वेद्युः प्रसन्नकल्पः प्रकृतिस्थ एव जातः जाताश्वया मया बन्धनान्निष्क्रम्य स्नापितोऽनुलेपितश्च परिधाप्य निष्प्रवाणि युगलम् अभ्यवहार्य्य परमान्नमोषधीरेष्वपि कामचारः कृतोऽभूत्। अथ निशीथे भूय एव वायुनिघ्नो निष्पत्य कान्तकं नृपतिदुहिता रमेयमिति रंहसा परेण राजपथमभ्यपतत्। निशम्य चाहं पृष्ठमेव गतमस्या वेलायामनुधावामि तत्प्रसीदत बद्धेनं मह्यमर्पयतेति यावदसौ

क्रन्दति तावदहं स्थविरे केन देवो मातरिश्वा वदपूर्व्वः किमेते काकाः क्रोऽकुर्यस्य मे निग्रहीतारः शान्तं पापमित्यभ्यधावम्। असावप्यमीभि स्वमेवोन्मत्ता या अनुन्मत्तइत्युन्मत्तं मुक्तवती कस्तमिदानीं बध्नातीति निन्दिता कदर्थिता रुदत्येव मामन्वधावत्। गत्वा च रागमञ्जरीगृहं चिरवियोगविक्लवामिमां वर्ज्ञावधं समाश्वास्य तां निशाशेषमनयम प्रभाते पुनश्चदारकेण च समगच्छे।

अथ भगवन्तं मरीचिं वेशलम्भादुत्थाय पुनःप्रतिपन्नतपःप्रभावप्रत्यापन्नदिव्यचक्षुषमुपसंक्रम्य तेनाख्यातम्भू तत्वद्दर्शनमवगमितः। सिंहघोषस्य कान्तकापचारं निर्भिद्य तत्पदे प्रसन्नेन राज्ञा प्रतिष्ठापितः तेनैव चारकसुरङ्गापथेन कन्यापुरप्रवेशं भूयोपि मे समपादयत्। समशंसि चाहं अम्बालिकामुखविश्रुतवार्त्तानुरक्तया राजदुहित्रा। तेष्वेव दिवसेषु चण्डवर्म्मा सिंहवर्म्मावधूतदुहितृप्रार्थनः कुपितोऽभियुज्य पुरमवारुणत्। अमर्षणश्चाङ्गराजो यावदरिः पारयामिकं विधिमाचिकीर्षति तावत्स्वयमेव सार्धं निर्भिद्य प्रत्यासन्नानपि सहायानप्रतीक्षमाणो निर्गत्याभ्यधिकबलेन विहिते महति साम्पराये भिन्नवर्म्मा सिंहवर्म्मा बलादग्राह्यत। अम्बालिका च बलवदभिगृह्य चण्डवर्म्मणा हठात् परिणेतुमात्मभवनमनीयत कौतुकच स किल क्षपावसाने विवाहलग्नमभूत्। अहन्तु धनमित्रगृहे तद्दिवाशायेव पिनद्धमङ्गलप्रतिसरस्यमेवमवोचं सखे समापतितमेवाङ्गनायाभिमतं राजमहार्थं सुगूढमेव सम्भूय पौरवृद्धैस्तदुपावर्त्तय उपाहृतस्य च हृतशिरसमेव प्रभुं द्रक्ष्यसीति। तथा च तेनाभ्युपगते गतायुषोऽमुष्य भवनमुत्सवाकुलम् उपसमाधीयमानपरिणयोपकरणम् हतस्ततःप्रवेशनिर्गमप्रवृत्तलोकसम्पातम् अत्यस्थानस्थितः सह प्रविश्य मङ्गलपाठकैः अम्बालिकापाणिपल्लवम् अग्नौ। साक्षिण्याथर्वणेन विधिनार्प्यमाणमादित्समानस्य आयामिनं बाहुदण्डमाकृष्य छुरिकयोरसि प्राहार्षम्। स्फुरतश्च कतिपयानन्यानपि धर्मविपक्षमग्रमयं हतविभक्तश्च तद्गृहमनुविचरन् वेपमानमधुरगात्रीं विशाललोचनामभि

निशाम्य तदात्विकसुखमनुबुभूषुस्तामादाय गर्भगृहमविशम्। अस्मिन्नेव क्षणे तवास्मि नवाम्बुवाहगम्भीरेण स्वरेणानुगृहीत इति।

श्रुत्वा च स्मित्वा च देवोऽपि राजवाहनः कथमसि चौर्य्यकर्म्मणि कर्णीसुतमप्यतिक्रान्त इत्यभिधाय पुनरवेक्ष्योपहारवर्म्माणम् आचक्ष्व तवेदानीमवसर इत्यभाषत।

इति दण्डिनः कृतौ दशकुमारचरिते अपहारवर्म्मचरितं नाम द्वितीय उच्छ्वासः।

तृतीय उच्छ्वासः।

सोऽपि सस्मितं प्रणम्यारभताभिधातुम्। देवोऽप्यहमस्मि पर्य्यटन्नेकदा गतो विदेहेषु मिथिलामप्रविश्यैव बहिः क्वचिन्मठिकायां विश्रमितुमेत्य तत्रापि वृद्धतापस्या दत्तपाद्यः क्षणमलिन्दभूमाववास्थिषि। तस्यास्तु मद्दर्शनादेव किमपि बद्धधारमस्रु प्रावर्त्तत। किमेतदम्ब कथय कारणमिति पृष्टा सकरुणमाचष्ट। जैवातृक ननु श्रूयते पतिरस्या मिथिलायाः प्रहारवर्म्मा नामासीत्। तस्य खलु मगधराजो राजहंसः परं मित्रमासीत्। तयोश्च वल्लभे बलशम्बरयोरिव वसुमतीप्रियम्वदे सख्यमप्रतिममदधाताम्। अथ प्रथमगर्भाभिनन्दिताञ्च प्रियसखीं दिदृक्षुः प्रियम्वदा वसुमतीं सह भर्त्रा पुष्पपुरमगमत्।

अस्मिन्नेव च समये मालवेन मगधराजस्य महज्जन्यमजनि तत्र लेशतोपि दुर्लक्ष्यां गतिमगमन्मगधराजः। मैथिलस्तु मालवेन्द्रप्रयत्नप्रापितः स्वविषयं प्रतिनिवृत्तो ज्येष्ठस्य संहारवर्म्मणः सुतैर्विकटवर्म्मप्रभृतिभिर्व्याप्तं राज्यमाकर्ण्य स्वस्रीयात्सुह्मपतेर्दण्डावयवमादि-

कुरटवीपथमवगाह्य लुण्ठकजनसर्व्वस्वोऽभूत्। तत्सुतेन च कनीयसा हस्तवर्त्तिना सहैकाकिनी वनचरशरवर्षभयपलायिता वनमगाहिषि तत्र च मे शार्दूलनखावलीढनिपतितायाः पाणिभ्रष्टः स बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत। तच्छवाकर्षिणश्च व्याघ्रस्यासूनिषुरिष्वसनयन्त्रमुक्तः क्षणादच्छिदत्। भिल्लदारकैः स बालोऽपाहारि। सा त्वहं मोहसुप्ता केनापि वृष्णिपालेनोपनीय स्वं कुटीरमावेश्य शमितोपक्रान्तव्रणा स्वस्थीभूय स्वभर्त्तुरन्तिकमुपतिष्ठासुरसहायतया यावद्व्याकुलीभवामि तावन्ममैव दुहिता सह यूना केनापि समेत्य तमेवोद्देशमागमत्।

सा मह्यं रुरोद रुदितान्ते च सा सार्थघाति सहस्तागतस्य राजपुत्रस्य किरातभर्तृहस्तगमनम् आत्मनश्च केनापि वनचरेण ग्रहविरोपणं स्वस्थापयत्य पुनस्तेनोपयन्तुं चिन्तितायाः निकृष्टजातिसंसर्गवैक्लव्यात्त्यागमपाकर्ष्य सदधमेन चामुना विविक्तविपिने स शिरःकर्त्तनोद्यमं तेन यूना यदृच्छया दृष्टेन तस्य दुरात्मनो हननम् आत्मनश्चोपयमनमभ्यकथयत्। स च एष मिथिलेन्द्रस्यैव कोऽपि सेवकः कारणविलम्बी तन्मार्गानुसारी जातः सह तेन भर्त्तुरन्तिकमुपसृत्य पुत्रवृत्तान्तेन शोचमस्य देव्याः प्रियम्वदायाश्चादर्शाव। स च राजा दिष्टदोषात् ज्येष्ठपुत्रैश्चिरं विगृह्य पुनरसहिष्णुतयातिमात्रं चिरं प्रयुद्ध्य बद्धः देवी च बन्धनं गमिता। दग्धा पुनरहमस्मिन्नपि वार्द्धके जीवितमपारयन्ती हातुं प्रव्रज्यां किलाग्रहीषम्। दुहिता तु मम हतजीविताशङ्का विकटवर्म्ममहिषीं कल्पसुन्दरीं किलाशिश्रियत्। तौ चेद्राजपुत्रौ निरपायावेवावर्द्धिष्येताम् इयता कालेन तवेमां वयोऽवस्थामस्प्रक्ष्येताम्। तयोश्च सतोर्न दायादा नरेन्द्रस्य प्रसह्य कारिणो भवेयुरिति प्रवृद्धमन्युरभिरुरोद।

श्रुत्वा च तापसीगिरमहमपि प्रवृद्धबाष्पो निगूढमभ्यधां यद्येव मम्ब समाश्वसिहि। नन्वस्ति कश्चिन्मुनिस्त्वया तदवस्थया पुत्राभ्युपपादनार्थं याचितस्तेन स सम्यग् वर्द्धितश्च। वार्त्तयमतिमहती किमनया

सोऽहमस्मि। शक्यश्च मयासौ विकटवर्म्मा यथाकथञ्चिदुपश्लिष्य व्यापादयितुम्। अनुजाः पुनरतिबहवस्तेऽपि घटन्ते पौरजानपदाः मान्तु न कश्चिदिहत्यः ईदृक्तया जनो जानाति। पितरावपि तावन्मां न संविदाते किमुतेतरे तदेनमर्थमुपायेन साधयिष्यामी-त्यवादिषम्। सा तु सदा सस्नेहं परिष्वज्य मुहुःशिरस्युपाघ्राय प्रस्नुतस्तनी सगद्गदमगदत्। वत्स चिरञ्जीव भद्र तव प्रसन्नोऽद्य भग-वान् विधिः अद्यैव प्रहारवर्म्मव्याधि विदेशजाताः यतः प्रलम्बमान पीनबाहुर्भवानपारं वत्सशोकसागरमद्योत्तारयितुं स्थितः अहो मह-द्भागधेयं देव्याः प्रियम्वदायाः इति हर्षनिर्भरा स्नानभोजनादिना मामुपाचरत् अस्मिंश्च यथास्मिन्मठैकदेशे निशि कटशय्याम्। अचि-न्तयञ्च विनोपाधिनायमर्थो न साध्यः स्त्रियश्चोपाधीनामुद्भवक्षेत्रम्। अतोऽन्तःपुरवृत्तान्तमस्या अवगम्य तद्द्वारेण किञ्चिच्छलमाचरेय-मिति। चिन्तापन्नस्यैव मयि महार्णवोन्मग्नमार्त्तण्डतुरगनिःश्वास-रयावधूतेव व्यावर्त्तत त्रियामा। समुद्रगर्भवासजडीकृत इव मन्द-प्रतापो दिवसकरः प्रादुरासीत्।

उत्थायावसायितदिनमुखनियमविधिस्तां मे मातरमवादिषम्। अम्ब जाल्मस्य विकटवर्म्मणः कच्चिदन्तःपुरवृत्तान्तमभिजानासी-त्यनवसितवचनएव मयि काचिदङ्गना प्रत्यदृश्यत। तामवेक्ष्य सा मे धात्री हर्षाश्रुकुण्ठकण्ठमाचष्ट। पुत्रि पुष्करिके पश्य भर्तृ-दारकम् अयमसावकृपया मया वने परित्यक्तः पुनरप्येवमागत-इति। सा तु हर्षनिर्भरनिपीडिता चिरं प्ररुद्य बहुविलप्य शान्ता पुनः स्वमात्रा राजान्तःपुरवृत्तान्ताख्याने न्ययुज्यत। उक्तञ्च तया कुमार कामरूपेश्वरस्य कलिन्दवर्म्मनाम्नः कन्या कल्पसुन्दरी कलासु रूपे चाप्सरसोऽप्यतिक्रान्ता पतिमप्यभिभूय वर्त्तते सदैकवल्लभः सतु बह्ववरोधोऽपि विकटवर्म्मेति। तामवोचम् उपसर्पैनां मत्प्रयुक्तैर्गन्ध-माल्यैरुपजनय चासमानदोषनिन्दादिना स्वभर्त्तरि द्वेषम्। अनु-रूपभर्तृगामिनीनाञ्च वासवदत्तादीनां वर्णनेन ग्राहयानुशयम्।

अवरोधनान्तरेषु चामुष्य विलसितानि सुगूढान्यपि प्रयत्नेनान्विष्य प्रकाशयन्ती मानमस्या वर्द्धयेति। पुनरिदमम्बामवोचम् इत्थमेव त्वयाप्यनन्यव्यापारया रूपाकृत्यासावुपस्थातव्या प्रत्यहञ्च यद्यत्तत्र वृत्तजातं तदस्मि त्वयावबोध्यः मदुक्त्या पुनरियमुदर्कस्वादुर्नोऽस्मत्क-र्म्मणः प्रसाधनाय कार्येवानपायिनी कल्पसुन्दरीमनुवर्त्तितामिति। ते च समर्थं तथैवान्वतिष्ठताम्।

केषुचिद्दिनेषु गतेषु व्याचष्ट मां मदम्बा वत्स माधवीव पिचुमर्दा-श्लेषिणी यथासौ शोच्यमात्मानं मन्येत तथोपपाद्य स्थापिता किं भूयः कृत्यमिति। पुनरहमभिलिखितकामः प्रतिकृतिमियममुष्यै नेया। नीताञ्चैनां निर्वर्ण्य सा नियतमेवं वक्ष्यति नन्वस्ति कश्चिदीदृगाकारः पुमानिति प्रतिब्रूह्येनां यदि स्यात्ततः किमिति तस्य यदुत्तरं सा दास्यति तदहमस्मि प्रतिबोधनीय इति। सा तथेति राजकुलमुपसंक्रम्य प्रतिनिवृत्ता मामेकान्ते न्यवेदयत् वत्स दर्शितोऽसौ चित्रपटस्तस्यै मत्तकाशिन्यै। चित्रीयमाणा चासौ भुवनमिदं सनाथीकृतं येन देवेऽपि कुसुमधन्वनि नेदृशी वपुःश्रीः सन्निधत्ते चित्रमेतच्चित्रतमं न च समवैमि यदीदृशमिदमिच्छया निर्म्मिमीते केनेदमालिखितमित्याहृतवती व्याहृतवती च। मया च स्मेरयोदीरितं देवि सदृशमाख्यापयसि भगवान् मकरकेतुरेवंसुन्दर इति न शक्यमेव सम्भावयितुम् अथ च विस्तीर्णोऽयमर्णवनेमिः क्वचिदीदृशमपि रूपं दैवशक्त्या सम्भवेत् अथ तु यथैवंरूपो रूपानुरूपाभिजनयौवनविद्याभिमानी कोऽपि युवा महाकुलीनश्च कश्चित्सन्निहितः स्यात् स किं लभ्यत इति। तयोक्तमम्ब किं ब्रवीमि शरीरं हृदयं जीवितमिति सर्वमिदमस्यमनर्घञ्च ततो न किञ्चिद-स्त्यते नचेदयं विप्रलम्भस्तस्यामुष्य दर्शनानुभवेन यथेदं चक्षु चरितार्थं भवेत्तथानुग्रहः कार्य्य इति। भूयोऽपि मया दृढतरीकर्तुमुपन्यस्तम् अस्ति कोऽपि राजसूनुरवन्ध्यदर्शनः अमुष्य वसन्तोत्सवे सह सखीभिर्नगरोपवनविहारिणी रतिरिव विग्रहिणी यदृच्छया दर्शनपथं गतासि गतश्चासौ कामशरैकलक्ष्यतां मामन्वबर्त्तिष्ट मया

च वामन्योन्यानुरूपैरन्यदुर्लभैराकारादिभिर्गुणातिशयैश्च प्रेर्यमाणया तया तदर्पितैरेव कुसुमशेखरस्रगनुलेपनादिभिश्चिरमुपासितासि साद्य च समतेन स्वयमेवाभिलिख्य त्वत्समधिगमाय गाढं त्वद्दर्शनाय प्रेषितम्। यश्च चेदर्थोऽभिलिखितस्तस्यामुष्यातिमानुषप्रागल्भ्यस्य प्रज्ञाप्रकर्षस्य न किञ्चिदुष्कृतं नास्ति तमद्यैव दर्शयेयं सङ्केतादेयमिति।

तया तु किञ्चिदिव ध्यात्वा पुनरभिहितम् "अम्ब तव नैतदिदानीं गोप्यतमम् अतः कथयामि। मम तातस्य राज्ञा प्रहारवर्म्मणा सह महती प्रीतिरासीत्। मातुश्च मे मानवत्याः प्रियवयस्या देवी प्रियम्वदासीत्। ताभ्यां पुनरजातापत्याभ्यामेव कृतः समयोऽभूत् आवयोः पुत्रवत्याः पुत्राय दुहितृमत्या दुहिता देयेति। ततस्तु मां जातां प्रनष्टापत्या प्रियम्वदेति प्रार्थयमानाय विकटवर्म्मणे दैवाद्दत्तवान्। अयञ्च निष्ठुरः पितृद्रोही नात्युपपन्नसंस्थानः कामोपचारेष्वनभ्यवेचक्षणः कलासु काव्यनाटकादिषु मन्दाभिनिवेशः शौर्योन्मादो दुर्विकत्थनोऽनृतवादी चास्थानवर्षी नातिरोचते ममैष भर्त्ता। विशेषतश्चैषु वासरेषु यदयमुद्याने मदन्तरङ्गभूतां पुष्करिकामप्युपान्तवर्त्तिनीमनादृत्य मय्यानङ्गसापत्न्यमत्सरामनात्मका मानमनाटकीयां रमयन्तिकां नामापत्यनिर्विशेषमस्मत्संवर्द्धितायाश्चम्पकलतायाः स्वयमवचिताभिः सुमनोभिरलमकार्षीत्। मदुपभुक्तमुक्ते चित्रकूटगर्भवेदिकागते रत्नतल्पे तया सह व्यहार्षीत्। अयोग्यश्च पुमानवन्धातुश्च प्रवृत्तस्तत्त्विमिव्यपेक्ष्यते। परलोकभयचैहिकेन दुःखेनान्तरितम्। अविषह्यं हि योषितामनङ्गशरनिषङ्गीभूतचेतसामनिष्टजनचिरसंवासयन्त्रणादुःखम्। अतोऽमुना पुरुषेण मामद्योद्यानमाधवीमण्डपे समागमय। तदाप्रभृत्यवगममात्रेणैव हि ममातिमात्रं मनोऽनुरक्तम्। अस्ति चायमर्थराशिरनेनामुं स्वे पदे प्रतिष्ठाप्य तमेवात्यन्तमुपचर्य्य जीविष्यामीति।" मयापि तदभ्युपेत्य प्रत्यागतम्। अतःपरं भर्त्तृदारकः प्रमाणमिति।

तत्तस्या एव सकाशादन्तःपुरसन्निवेशमन्तर्वंशिकपुरुषस्थानानि प्रमदवनप्रदेशानपि विभागेनावगम्य अस्तगिरिशिखरपातक्षुभित शोणितइव शोणीभवति भानुबिम्बे पश्चिमाम्भोधिपयःपातनिर्व्वापित पतङ्गाङ्गारधूमसम्भारइव भरितनभसि तमसि विजृम्भिते परदार परामर्शोन्मुखस्य ममाचार्य्यकमिव कर्त्तुमुत्थिते गुरुपरिग्रहइव स्वामिनि ग्रहाधीश्वरे छायाकारे चारुसुन्दरीवदनपुण्डरीकेणेव मदर्श-नातिरागप्रथमोपनतेन स्मयमानेन चन्द्रमण्डलेन सन्धुक्ष्यमाणतेजसि त्रिभुवनविजिगीषोद्यते देवे पुष्पधन्वनि यथोचितं शयनीयमभजे। अचीकरच्च सिद्धप्राय एवायमर्थः किन्तु परकलत्रलङ्घनाद्धर्म्मपीडा भवेत् साप्यर्थकामयोर्द्वयोरुपलम्भे शास्त्रकारैरनुमतैवेति। गुरुजन बन्धमोक्षोपायाभिसन्धिना मया चैष व्यतिक्रमः कृतः। तदपि पापं निर्द्दिश्य कियत्यापि धर्म्मकलया मां समग्रयेदिति। अपि त्वेतदा-कर्ण्य देवो राजवाहनः सुहृदो वा किं नु वक्ष्यन्तीति चिन्तापराधीन एव निद्रया पराम्रष्ये। अदृश्यत स्वप्ने भगवान् भर्गः आह स्म च "सौम्य उपहारवर्म्मन् मास्म ते दुर्विकल्पोऽभूत् यतस्त्वमसि मदंशः मज्जटाभारलालनोचिता अमरसरिदसौ वरवर्णिनी तस्य कदाचि-द्दूलागसो जलक्रीडां कुर्व्वन्नतिचक्षत। सा च सपत्नीतनयविद्विष्टा विलोकनामयाच्यमाना तमशपत् एहि मर्त्त्यत्वमिति। सोऽप्यहेतुक शापप्रदानात् क्रुद्धस्तामशपत् यथेष्ट बहुभोग्या तथा प्राप्यापि मानु-ष्यकमनेकसाधारणी भवेति। ततस्तेन प्रतिशप्ता सा विलप्येव मा-मुपसृत्य सगद्गदमगदत् स्वामिन्नहमनवरतभवच्चरणपरिचर्य्याविधा-यिनी न शापार्हस्याकर्ण्य कृपाक्रान्तमनसा मयोक्तं प्रिये नास्य शापो-ऽन्यथा भवितुमर्हति परं त्वदनुग्रहार्थमहमात्मनोऽंशं द्विधा विभज्य विकटवर्म्मात्मपक्षेण मिथिलापतिप्रहारवर्म्मात्मजोपहारवर्म्मात्मना च मर्त्यलोकेऽवतरिष्यामि त्वञ्च कामरूपाधिपतेः कलिन्दवर्म्मनाम्नः कन्या कल्पसुन्दरी नाम भूत्वा ज्यायसा मदंशेन विकटवर्म्मणा प्रथम मणीयांसमनेहसं सङ्गता तस्मिन्नुपहारवर्म्मणि समूर्त्ताविव स्वय

मुपगते पुनरस्य पञ्चात्मकं कनीयांसं मदंशमुपलभ्य तेन सार्कं विविधसुखोपभोगमनुभविष्यसि तदयमर्थो भव्यो। भवता निरा-शङ्क्यइति।

प्रतिबुध्य च प्रीतियुक्तस्तदहरपि प्रियासङ्केतशालिकरादिकार-मेनानैषम्। अन्येद्युरनन्यथावृत्तिरनङ्गो मय्येव इषुवर्षमवर्षत्। अगुप्यच्च ज्योतिष्मतः प्रभामयं सरः। प्रासरच्च तिमिरमयः कर्दमः। कार्दमिकनिवसनश्च दृढतरपरिकरः खड्गपाणिरुपसंभृतप्रस्तुतोप-करणः सरन् मालदन्ताभ्यभिधानानि राजमन्दिरपरिखामुदम्भसमुपा-तिष्ठम्। अथोपपन्नां मालद्धद्वारे पुष्करिकया प्रथमसन्निधापितां वेणुयष्टिमादाय तया शायितया च परिखां लापितया च प्राकारमध्य-रूढम्। अधिरुह्य पक्वेष्टकचितेन गोपुरोपरितलाधिरोहेण सोपानपथेन भुवमवातरम्। अवतीर्य च बकुलवीथीमतिक्रम्य चम्पका-वलिवर्त्मना मनागिवोपसृत्योत्तराभि कतमं चक्रवाकमिथुनरवम-श्रृणवम्। पुनरुदीचा पाटलापथेन स्पर्शलभ्यविशालसौधकुड्यो-दरेण प्रदक्षिणमिव गत्वा पुनः प्राचा पिण्डीभाण्डीरखण्डमखिलेभय पार्श्वेन सैकतपथेन किञ्चिदन्तरमतिक्रम्य पुनरवाचीं चूतवीथीमगा-हिषि। ततश्च गहनतरमुदरोपरचितरत्नवेदिकं माधवीलतामण्डप-मीषद्विवृतसमुद्गकोन्मिषितभासा दीपवर्त्या व्यक्तपश्यम्। प्रविश्य चैक-पार्श्वे कुसुमपुष्पनिरन्तरं कुरबकपोतपिहितभित्तिपरिगतं गर्भगृहम् अ-वनिपतिताच्छाभ्रोमशाखामयम् अभिनवकुसुमकोरकपुलकलाञ्छितं प्रत्यग्रप्रवालपटलपाटलं कपाटमुद्घाट्य प्राविक्षम्। तत्र चासीद्विस्तीर्णं कुसुमशयनं सुरतोपकरणवस्तुगर्भाश्च कमलिनीपलाशसम्पुटाः दन्त-मयतालवृन्ताः सुरभिसलिलभरितश्च भृङ्गारकः समुपविश्य मुहूर्तं विश्रान्तः परिमलमतिप्रत्यवन्तमाघ्रासिषम्। अश्रौषं च मन्दमन्दं पद-शब्दम्। श्रुत्वैव सङ्केतगृहाद्विनिर्गत्य रक्ताशोकस्कन्धपार्श्वपरिपिहिताङ्गः स्थितोऽस्मि। सा च सुभ्रूः सुश्रोणिकामा शनैरुपेत्य तत्र मामदृष्ट्वा बलवदव्यथिष्ट। अस्रजश्च मत्तराजहंसीव कण्ठरागवल्गुगद्गदां गिरं

“अहमस्मि विप्रलब्धा नास्त्युपायः प्राप्तुम् अयि हृदय किमिद मवाप्यं [illegible]दध्यवसाय तदसम्भवे किमेवमुत्ताम्यसि। भगवन् पञ्च बाण कस्तवापराधः कृतो मया यदेवं दहसि न च भस्मीकरोषीति।”

अथाहमाविर्भूय विवृतदीपभाजनो भामिनि ननु बद्धपराद्धं भवत्या चित्तजन्मनः यदमुष्य जीवितभूतां रतिमाकृत्या कदर्थितवती धनुर्यष्टिं भ्रूलताभ्यां भ्रमरमालामयीं ज्यां नीलालकद्युतिभिः अस्त्रा-ण्यपाङ्गवीक्षितैः महारजनध्वजपटांशुकं दशनच्छदमयूखजालैः प्रथम सुहृदं मलयमारुतं परिमलपटीयसा निश्वासपवनेन परभृतवल्गमति मञ्जुलैः प्रलापैः पुष्पमयीं पताकां भुजयष्टिभ्यां दिग्विजयारम्भपूर्ण कुम्भमिथुनमुरोजयुगलेन क्रीडासरोनाभिमण्डलेन सन्नाह्यरथमण्डलं श्रोणिमण्डलेन भवनरत्नतोरणस्तम्भयुगलमूरुयुगलेन लीलाकर्णकिस लयं चरणतलप्रभाभिः अतः स्थाने एव त्वां दुनोति मकरकेतुः। मां पुनरनपराधमधिकमायासयतीत्येष एव तस्य दोषः। तत्प्रसीद सुन्दरि जीवय मां जीवनौषधेरिवापाङ्गैरनङ्गभुजङ्गदष्टमित्याश्लिष्ट वान् शरीरमथ रागावेशपेशलां विशाललोचनाम्। अवसितार्थांश्च आरक्तचिकुरितत्वचाम् ईषत्स्वेदरेखोद्भेदजर्जरकपोलमूलाम् अन-र्गल कलप्रलापिनीमकस्मादशनकरस्पर्शार्पणश्लथितकराम् अन्यथापरि-श्लथाङ्गीमार्तामिव लक्षयित्वा मानसीं शारीरीं धारणां शिथिल यन् आत्मानमपि तया समानार्थमापादयम्। तत्क्षणविमुक्तसङ्कृता रतावसानिकविधिमनुभवन्तौ चिरपरिचिताविवातिरूढविश्रम्भौ क्षण मवातिष्ठावहि। पुनरहमुष्णमायतञ्च निश्वस्य किञ्चिद्दीनदृष्टिः सचकितप्रसारिताभ्यां भुजाभ्यामनतिपीडं परिष्वज्य नातिविशद मचुम्बिषम्। अश्रुमुखी तु सा यदि प्रयासि नाथ प्रयातं मे जीवितं गमय नय मामपि [illegible]चेदासजनो निष्प्रयोजन इत्यञ्जलिमवतंसताम नैषीत्। अवादिषञ्च ताम् अयि मुग्धे कः सचेतनः स्त्रियमभिकामय-मानां नाभिनन्दति। यदि मदनुग्रहनिश्चलस्तवाभिसन्धिः आचरा विचारं मदुपदिष्टम्। आदर्शय राज्ञे मत्सादृश्यगर्भं चित्रपटम्

आचक्ष्व च किमियमाकृतिः पुरुषसौन्दर्य्यस्य परमारूढा न वेति । बाढमारूढेति नूनमसौ वक्ष्यति । ब्रूहि भूयो यद्येवम् अस्ति कापि तापसी देशान्तरभ्रमणलब्धप्रागल्भ्या मम च मातृभूता तदेतमालेख्य रूपं पुरस्कृत्याहमुक्ता “सोऽस्ति तादृगुपायो । येन त्वमुपोषिता पर्वणि विविक्तायां भूमौ पुरोहितेद्धे महति सप्तार्चिषि मन्त्रमेकाकिनी शतं चन्दनसमिधः शतमगुरुसमिधः कर्पूरमुष्टीः पट्टवस्त्राणि च प्रभूतानि हुत्वा भविष्यस्येवमाकृतिः । अथ घोषयिष्यसि घण्टो घण्टापुटकमिताहतश्च भर्त्ता भवत्यै सर्वं रहस्यजातमाख्याय निमीलिताक्षो यदि त्वामालिङ्गेत् इयमाकृतिरमुमुपसंक्रामेत् त्वन्तु भविष्यसि यथा पुराकारैव यदि भवत्यै भवत्प्रियाय च एवं रोचेत । नचास्मिन्विधौ विसंवादः शङ्क्य इति” वपुश्चेदिदं तवाभिमतं सह सुहृन्मन्त्रिभिरनुज्ञैः पौरजानपदैश्च संमन्त्र्य तेषामप्यनुमते कर्म्मण्यभिमुखेन स्थेयमिति । स नियतमभ्युपैष्यति पुनरस्यामेव प्रमदवनवाटीध्वङ्क्षाटिकायामाथर्वणिकेन विधिना संज्ञपितपशुनाभिज्वल्यमुक्त हिरण्यरेतसि तद्धूमगमनेन संप्रविष्टेन मया अस्मिन्नेव लतामण्डपे स्थातव्यं त्वं पुनः प्रगाढायां प्रदोषवेलायामापादयिष्यसि कर्णे शठ शठकनर्म्मस्मिता विकटवर्म्मीणं धूर्त्तोऽसि त्वमज्ञातश्च मदनुग्रहवत्ते नापि रूपेण लोकलोचनोत्सवायमानेन मत्पत्नीरभिरमयिष्यसि । नाहमात्मविनाशाय वैतालोत्थापनमाचरेयमिति । श्रुत्वेदं त्वद्वचः स यद्वदिष्यति तन्मह्यमेकाकिन्युपागत्य निवेदयिष्यसि ततः परमहमेव ज्ञास्यामि मत्पदचिह्नानि चोपवने पुष्करिकया प्रमार्जयेति । सा तथेति शास्त्रोपदेशमिव मदुक्तमादृत्यात्मसुरतरागेव कथं कथमप्यगादन्तःपुरम् । अहमपि यथाप्रवेशं निर्गत्य स्वमेवावासमयासिषम् ।

अथ सा मत्तकाशिनी तथा तमर्थमन्वतिष्ठत् । अतिष्ठच्च तन्मते स दुर्म्मतिः । श्वःप्रभृति च पौरजानपदेष्वियमद्भुतायमाना वार्त्ता “राजा किल विकटवर्म्मा देवीमन्त्रबलेन देवयोग्यं वपुरासादयिष्यति ।

नूनमेष न विप्रलम्भोऽतिकल्याणः केव कथा प्रमादस्य सम्भिन्नेवान्तः पुरोपवने सायमधिगम्यैव सम्पाद्यः किलायमर्थः। तथापि बृहस्पति प्रतिमबुद्धिभिः मन्त्रिभिरप्यभ्यूह्यानुमतः। यद्येवं भावि नान्यदतः परमस्ति किञ्चिदद्भुतम् अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति,, प्रवृत्तवत्सु लोकवादेषु प्राप्ते पर्व्वदिवसे प्रगाढायां प्रौढतमसि प्रदोषवेलायामन्तःपुरोद्यानादुदैरत धूर्ज्जटिकण्ठधूम्रं धूमोद्गमः क्षीराज्यदधितिलगौरसर्षपवसामांसरुधिराहुतीनाञ्च परिमलः पवनानुसारी च दिशि दिशि प्रावात्सीत्।

प्रशान्ते च सहसा धूमोद्गमे तस्मिन्नहमविशं निशान्तोद्यान मागमच गजगामिनी। आलिङ्ग्य च मां सस्मितं समभ्यधत्त धूर्त सिद्धं ते समीहितम् अवसितश्च प्रसरो। अमुष्य चोपप्रलोभनाय त्वदादिष्टया दिशा मयोक्तं कितव न साधयामि ते सौन्दर्य्यम् एवं सुन्दरोऽपि त्वमप्सरसामपि स्पृहणीयो भविष्यसि किमुत मानुषीणां मधुकर इव निसर्गचापलात् यत्र क्वचिदासज्जति भवादृशो [illegible] इति। तेन तु मे पादयोर्निपत्याभिहितं रम्भोरु सहस्व मन्तूनि दुश्चरितानि मनसापि न चिन्तयेयमितः प्रभृतीतरनारीः त्वदस्य प्रहृते चार्म्मणीति। तदहमीदृशेन वैवाहिकेन नेपथ्येन त्वामभिसृत-वती। प्रागपि राजाभिसन्धिकमनङ्गेन गुरुणा दत्तैव तुभ्यमेषा जाया पुनरपीमं जातवेदसं साक्षीकृत्य स्वच्छन्देन दत्तेति। प्रपदेन चरणपृष्ठे निष्पीड्योल्लिखितपादपार्ष्णिः इतरेतरव्यतिषक्तकोमलाङ्गुलि दलेन भुजलतायुगेन कन्धरां समावेष्ट्य सलीलमानननमय्य स्वयं मुकुलितमुखकमला विश्रान्तविशालहृदि रसवदचुम्बत्।

अपि नाम इहैव कुरबकगुल्मगर्भे तिष्ठ यावदहं निर्गत्य साधयेयं साध्यं सम्यगिति विहस्य तामुपहूय होमानलप्रदेशमशोककाननाव-लम्बिनीं चण्डामचालयम्। अनुगम्य च सा तं जनं हतान्तदूतीवाक्र-मन्ती। प्रावर्त्तिषि च स्वहमगुरुचन्दनप्रमुखानि होतुम् आयासीच राजा यथोक्तं देशम्। आत्रापन्नमिव किञ्चित्सविस्मयं विचार्य्य तिष्ठन्त

मद्वचनं ब्रूहि सत्यं भूयोऽपि मे भगवन्तं चित्रभानुमेव साक्षीकृत्य न चेदनेन रूपेण मह्यमद्योऽभिरमयिष्यसि ततस्त्वयि इदं रूपं संक्रामयेयमिति। स तदैव देव्येवेयं नोपधिरिति स्फुटोपजात संप्रत्ययः प्रावर्त्तत प्रपञ्चाय। स्मित्वा पुनर्मयोक्तं किं वा प्रपञ्चेन केन हि मानुषी मां परिभविष्यति यथासुरेभिः संक्रम्यसे संक्रम्यस्व कामं वाचय कानि ते रहस्यानि तत्कथनान्ते हि त्वत्स्वरूपभ्रंश इति। सोऽब्रवीत् अस्ति बद्धो मत्पितुः कनीयान् भ्राता प्रहारवर्म्मा तं विषान्नेन व्यापाद्याजीर्णदोषं ख्यापयेयमिति मन्त्रिभिः सहाध्यवसितम्। अनुजाय विशालवर्म्मणे दण्डचक्रं पुण्ड्राभियोगाय दित्सितम् पौरवृद्धश्च पाञ्चालिकः परिवृत्तश्च सार्थवाहः खनतिनामा यवनादश्म मेकं वसुन्धरामूल्यं लघीयसार्घेण लब्धमिति ममैकान्तेऽमन्त्रयताम्। मदृष्टपतिश्च समासन्नरङ्गभूतो जनपदमहत्तरः शतह्लिरलीकवाद शीलमवलेपवन्तं दुष्टग्राममहत्तममनन्तसीरं जनपदकोपेन घातयेयमिति दण्डधरानुद्धारकर्म्मणि मत्प्रयोगान्नियोक्तुमभ्युपागमत्। इत्थमिदमचिरप्रसूतं रहस्यम् इत्याकर्ण्य तम् इयत्तवायुरुपपद्यस्व स्वकर्म्मार्जितां गतिमिति छुरिकया द्विधाकृत्य तत्क्षणमात्रं तस्मिन्नेव प्रवृत्त स्फीतसर्पिषि चिरस्थिरेतस्यानुवृत्तम् अभूच्चासौ भस्मसात्। अथ स्त्रीस्वभावादीषद्विक्लवां हृदयवल्लभां समाश्वास्य हस्तकिसलयेऽवलम्ब्य गत्वा तद्गृहमनुयायस्थाः सर्व्वाण्यन्तःपुराणि प्रविश्य यथायथं सेवां दत्तवान्। विस्मितविलासिनीसार्थमध्ये कथञ्चिदपहृत्य कालं विसृष्टावरोधमण्डलस्तामेव संहतोरुमूलपीडमुरःपीडञ्चोपगृह्य तल्पेऽभिरमयन्नन्यामिव तां निशामनैषम्। अथ प्रभाते च तन्मुखात्तद्राजकुलस्य शीलम्। उषसि स्नात्वा कृतमङ्गलो मन्त्रिभिः सह समगच्छे तांश्चाब्रुवम् आर्य्याः रूपेणैव सह परिवृत्तो मम स्वभावः। य एष विषान्नेन हन्तुं चिन्तितः पिता मे स मुक्ता समेतदाज्यं भूय एव राज्ये स्थापयितव्यः पितृवदनुपालनीयश्च शुश्रूषयैव वर्त्तामहे नह्यस्ति पितृवधात्परं पातकमिति। भ्रातरञ्च विशालवर्म्माणमाहूयोक्तवान्

यत्र न सुभिक्षाः साम्प्रतं पुरुषाः ते दुःखमेवोपपद्यन्ता स्त्यक्तात्मानो राष्ट्रं नः सुभिक्षमभिद्रवेयुः । अतो मुष्टिवधः सस्यवधो वा यदोत्पद्यते तदाभियास्यसि नाद्य यात्रा युक्तेति । नगररक्षादावप्यनापिषम् अल्पीयसा मूल्येन महार्घं वस्तु मास्तु मे लभ्यं धर्मरक्षायै तदनुगुणेनैव मूल्येनादः क्रीयतामिति । प्रत्यहमिव राष्ट्रमुख्यमाज्ञयाख्यातवान् योऽसावनन्तसीरः प्रहारवर्म्मणः पक्षइति निनाशयिषितः सोपि पितरि मे प्रकृतिस्थे किमिति नाश्येत तच्चयापि तस्मिन् संरम्भो न कार्य्यइति ।

तदिमे सर्व्वमाभिचानिकमुपलभ्य सत्यवायमिति निश्चिन्वाना विस्मयमानाश्च मां महादेवीञ्च प्रशंसन्तो मन्त्रबलानि चोद्दामयन्तो । बन्धनात्पितरौ निष्क्रमय्य स्वं राज्यं प्रत्यपादयन् । अहञ्च तया मे धात्र्या सर्व्वमिदं समाचेष्टितं रहसि पित्रोरवगमय्य प्रहर्षकाष्ठाधिरूढयोस्तयोः पादमूलमभजे । अभवञ्च यौवराज्यलक्ष्म्या तदनुज्ञया तया प्रसाधितात्मा देवपादविरहदुःखदुर्भगान् भोगानिर्व्विशन् भूयोऽस्य पितृसखस्य सिंहवर्म्मणो लेखाच्चण्डवर्म्मणश्चम्पाभियोगमवगम्य प्रभुवधोऽभिचरणे चोभयमपि करणीयमेवेत्यधुना लघुसमुत्थानेन सैन्यचक्रेणाभ्यसरम् अभूवञ्च भूमिस्वत्पादलक्ष्मीसाक्षात्क्रियामहोत्सवानन्दराशेरिति ।

श्रुत्वैतद्देवो राजवाहनः सस्मितमवादीत् पश्यत पारतल्पिकमुपधियुक्तमपि गुरुजनबन्धव्यसनमुक्तिहेतुतया दुष्टामित्रप्रमापणाभ्युपायतया राज्योपलब्धिमूलतया च पुष्कलावर्थधर्म्मावप्यारीरधत् । किं हि बुद्धिमद्भिः प्रयुक्तं नाभ्युपैति शोभाम् इत्यर्थपालमुखे निधाय स्निग्धदीर्घां दृष्टिम् आचक्ष्व भवानात्मीयचरितमित्यादिदेश ।

इति श्रीदण्डिनः कृतौ दशकुमारचरिते उपहारवर्म्मचरितं
नाम तृतीय उच्छ्वासः ।

चतुर्थ उच्छ्वासः।

अर्थपाल चरितम्।

सोऽपि बद्धाञ्जलिरभिदधे देव सोऽहमप्येभिरेव सुहृद्भिरेककार्य्यो उर्म्मिमालिनीमिभूमिवलयं परिभ्रमन्नुपासरं कदाचित् काशिपुरीं वाराणसीम् उपस्पृश्य मणिभङ्गनिर्म्मलाम्भसि मणिकर्णिकायाम् अविमुक्तेश्वरं भगवन्तमन्धकमथनमभिप्रणम्य प्रदक्षिणं परिभ्रमन् पुरुषमेकमायामवन्तमायसपरिघपीवराभ्यां भुजाभ्यामाबध्यमानपरिकरमनवरतरुदितोच्छूनताम्रदृष्टिमद्राक्षम्। अतर्कयञ्च कर्कशोऽयं पुरुषः कार्पण्यमिव वर्षति मुनतारं चक्षुः आरम्भश्च साहसानुवादी नूनमसौ प्राणनिस्पृहः किमपि कृच्छ्रं प्रियजनव्यसनमूलं प्रपित्सति तत् पृच्छेयमेनम् अस्ति चेत् ममापि कोऽपि साहाय्यावकाशस्तमेनमभ्युपपद्य इति अपृच्छं भद्र सन्नाहोऽयं साहसमवगमयति न चेद्गोप्यमिच्छामि श्रोतुं शोकहेतुमिति। स मां सबहुमानं निर्वर्ण्य को दोषः श्रूयतामिति क्वचित् करवीरतले मया सह निषण्णः कथामकार्षीत्।

महाभाग सोऽहमस्मि पूर्व्वेषु कामचरः पूर्णभद्रो नाम गृहपतिपुत्रः प्रयत्नसंवर्द्धितोऽपि पित्रा दैवच्छन्दानुवर्त्ती चौर्य्यवृत्तिरासम्। अथास्यां काशीपुर्य्यामर्थवर्य्यस्य कस्यचित् गृहे चोरयित्वा रूपाभिग्राहितो बद्धः। बद्धे च मयि मत्तहस्ती मृत्युविजयो नाम हिंसाविहारी राजगोपुरोपरितलाधिरूढस्य पश्यतः कामपालनाम्नः उत्तमामात्यस्य शासनाज्जनकण्ठरवद्विगुणितघण्टारवो मत्त-

लितहस्तकाण्डः समभ्यधावत् । अभिपत्य च मया निर्भयेन निर्भर्त्सितः परिभ्रमन् दारुखण्डसुषिरानुप्रविष्टोभयभुजदण्डखण्डघटित प्रतिमानो भीतवत्प्रवर्त्तिष्ट । भूयश्च तेन जातसंरम्भेण निकाम दारुणैर्वामाङ्घ्रिप्रपादपातैरभिमुखीकृतः । मयापि द्विगुणाबद्धमन्युना निर्भर्त्स्याभिहतो निहत्यापाद्रवत् । अथ मया निपत्य सरभसमाकृष्टो गच्छ यत्ता हन्त हतोऽसि कुञ्जरापसदेति निशितेन वारणेन चारुणां मुञ्जमुञ्जरभिन्नन् निर्याणभागे कथमपि मदभिमुखमकरोत् । अथायोधम् अपसरतु द्विरदकीटश्रयः अन्यः कश्चिन्मातङ्ग प्रतिरानीयतां येनाहं मुहूर्त्तं विहृत्य गच्छामि गन्तव्यां गतिमिति । हृष्टेव स मां सहमुद्धूर्णन्समुत्क्रान्तनियन्तृनिष्ठुरात्मा पलायिष्ट । मन्त्रिणा पुनरहमाज्ञयाभ्यधायिषि भद्र स्कन्दुरेवेन स्कन्दुविजयो नाम हिंसाविहारी सोऽयमपि तावत्त्वयैव हतः तदिदम कर्म्मणोऽस्मात्सम्भवोमसात् किमन्यमसि प्रपद्यस्त्वानाय्यंकृत्या वर्त्तितुमिति । यथा स्थापितोऽस्मीति विज्ञापितोऽयं मया नियन्त्रमन्ववर्त्तिष्ट । एतच्च मयैकदा रहसि जातविस्रम्भो व्याभाषत स्वचरितम् ।

आसीत् कुसुमपुरे राज्ञोऽरिपुञ्जयस्य मन्त्री धर्म्मपालो नाम विश्रुतधीः श्रुतर्षिः अमुष्य पुत्रः सुमित्रोनाम पितेव समः प्रज्ञागुणेषु तस्यास्मि द्वैमातुरः कनीयान् भ्राताहम् । वेश्यासु विश्वस्तं मामसौ विनयश्चिरवारयत् । अवार्य्यदुर्व्ययश्चाहमपसृत्य दिक्षु खेदं भ्रमन् यदृच्छयास्यां वाराणस्यां प्रमदवने मदनाराधनाय निर्गत्य सह सखीभिः कन्दुकेनानुक्रीडमानां काशीभर्त्तुश्चण्डसिंहस्य कन्यां कान्तिमतीं नाम चकमे कथमपि समगच्छे च । अथ कन्यैव विहरता कुमारीपुरे सा मयासीदापन्नसत्वा कश्चित्सुतञ्च सूतवती । मृतजात इति सोऽपविद्धोऽरहस्यनिर्भेदभयात्परिजनेन क्रीडाद्रिले प्रवर्यां च श्मशानं नीतः । तदैव निवर्त्तमानया निशीथे राजवीथ्यामारक्षिकपुरुषैरभिगम्य तर्जितया दण्डपारुष्यभीतया निर्भिन्नं रहस्यम् । राजाज्ञया निशीथे अहमाक्रीडगिरिदरीगृहे विस्रब्धप्रसुप्तस्तयोप-

दर्शितायथोपपन्नरज्जुबद्धः श्मशानमुपनीय मातङ्गेनायतेन कृपाणेन प्राजिहीर्ष्ये। नियतिबलाल्लूनबन्धः समसिमाच्छिद्यान्त्यजं तमन्यांश्च कांश्चिद्धत्वापासरम्। अपरस्याञ्च भ्रमन्नटव्याम् एकदासुमुखा कयापि दिव्याकारया सपरिवारया कन्ययोपास्थायिषि। सा मामञ्जलिकिसलयोत्तंसितेन मुखविलोलकुन्तलेन मूर्ध्ना प्रणम्य मया सह वनवटद्रुमस्य कस्यापि मूलतः प्रच्छायशीतले तले निषण्णा कासि वासु कुतोऽस्यागता कस्य हेतोरस्य मे प्रसीदसीति साभिलाषमाभाषिता मया वाङ्मयं मधुवर्षमवर्षत्।

आर्य नाथस्य यक्षाणां माणिभद्रस्यास्मि दुहिता तारावली नाम। साहं कदाचिदगस्त्यपत्नीं लोपामुद्रां नमस्कृत्यापावर्त्तमाना मलयगिरेः परेतावासे वाराणस्याः कमपि दारकं रुदन्तमद्राक्षम्। आदाय चैनं तीव्रस्नेहान्मम पित्रोः सन्निधिमनैषम् अनैषीच्च मे तातो देवस्यालकेश्वरस्यास्थानीम्। अथाहमाज्ञयाप्ता हरसखेन बाले बालेऽस्मिन् कीदृशस्ते भाव इति औरस इवास्मिन् वत्स वत्सलेति मया विज्ञापितः सत्यमाह वराकीति तन्मामतिमहतीं कथामकरोत्। तत्रैतावन्मयावगतं त्वं किल शौनकः शूद्रकः कामपालश्चाभिन्नः। बन्धुमती विनयवती कान्तिमती चाभिन्ना। वेदिमती यज्ञदासी सोमदेवी चैकैव। हंसावली शूरसेना सुलोचना चानन्या। नन्दिनी रङ्गपताका इन्द्रसेना चापृथग्भूता। या किल शौनकावस्थायामग्निसाक्षिकमात्मसात्कृता गोपकन्या सैव किलार्यदासी पुनश्चाद्य तारावलीत्यभूवम्। बालश्च किल शूद्रकावस्थे त्वयि आर्यदास्यवस्थायां मय्युदभूत्। अवदातश्च विनयवत्याश्च वासनया स तु तस्यां कान्तिमत्यवस्थायामेवोदभूत्। एवमनेकजन्मसुखपरिभ्रष्टं देवान्मयोपलब्धं तमलकापतेरादेशात् वनतपस्विनो राजहंसस्य देव्यै वसुमत्यै तत्सुतस्य भाविचक्रवर्त्तिनो राजवाहनस्य परिचर्यार्थं समर्प्य गुरुभिरभ्यनुज्ञाता त्वदन्तिकमागात् त्वत्तान्तमुखपरिभ्रष्टस्य ते पादपद्मशुश्रूषार्थमागतास्मीति।

श्रुत्वा तामनेकजन्मान्तरमज्जीमसकृदाश्लिष्य हर्षाश्रुमुखो मुहुर्मुहुः सान्त्वयित्वा तत्प्रभावदर्शिते महति मन्दिरे अहर्निशं भूमिदुर्लभान् भोगाननन्वभूवम्। कियन्त्यपि दिनान्यतिक्रम्य मत्तकाशिनीं तामवादिषम् प्रिये प्रत्यपकृत्य मत्प्राणद्रोहिणश्चण्डसिंहस्य वैरनिर्यातनसुखमनुबुभूषामीति। तया सस्मितमभिहितम् यद्यहं कान्त कान्तिमतीदर्शनाय नयामि त्वामिति स्थितेऽर्द्धरात्रे राज्ञोवासगृहमनीये। ततस्तच्छिरोभागवर्तिनीमादायासियष्टिं प्रबोध्यैनं प्रस्फुरन्तमब्रुवम् अहमस्मि भवज्जामाता भवदनुमत्या विना तव कन्याभिमर्शी तमपराधमनुरुध्य प्रमाथुं मामागतइति। सोऽतिभीतो मामभिप्रणम्याह अहमेव मूढोऽपराद्धः यस्तव दुहितृसंसर्गानुयाचिनो यद्ययस्कवोत्क्रान्तसीमा समादिष्टवान् वधम्। तदास्तां कान्तिमती राज्यमिदं मम च जीवितमद्यप्रभृति त्वदधीनमित्यवादीत्। अथापरेद्युः प्रकृतिमण्डलं सन्निधाप्य विधिवदात्मजायाः पाणिमग्राहयत्। अन्यायेन च तनयवार्ती तारावली कान्तिमत्ये सोमदेवीसुलोचनेन्द्रसेनाभ्यश्च पूर्व्वजातिवृत्तान्तम्। इत्यनघं मयि प्रदायादेशं यौवराज्यमनुभवन् विहरामि विलासिनीभिरिति।

सएवं मातृश्चेपि जन्तौ परिचर्य्यानुवर्त्ती श्वशुरेण सर्वभूतानामनसकेन स्वर्गते श्वशुरे ज्यायसि च ग्रामे चण्डघोषनाम्नि क्षीणेऽतिप्रसङ्गात्प्रागेव अपटीयायुषि पञ्चवर्षदेशीयं सिंहघोषनामानं कुमारमभ्यषेचयत्। अवर्धयच्च विधिनैनं स साधुः। तस्यात्र यौवनोन्मादिनः पैशुन्यवादिनो दुष्कर्म्मचिवाः कतिचिदासन्नन्तरङ्गभूताः तैः किलायाविस्थमयाख्यात “प्रसह्यैव स्वसा तवामुना भुजङ्गेन संगृहीता पुनः प्रसुप्ते राजनि प्रहर्तुमुद्यतासिरासीत्, तेनास्मै तत्क्षण प्रबुद्धेन भीत्यानुनीय दत्ता कन्या। तस्य देवज्येष्ठं चण्डघोषं विषेण हत्वा प्राणोऽयमसमर्थइति त्वमद्यापि प्रकृतिविश्रम्भायोपेक्षितः। क्षिप्येति च पुरा स कृतघ्नो भवन्तम्। तमेवाश्मकपुरं गमयितुं यतस्वेति।” स तथा दूषितोऽपि यक्षीप्रभावान्नानुष्ठितम् पापमाचरितु

मग्नकत्। एषु किंच दिवसेष्वयथापूर्व्वमाक्रान्तो कान्तिमत्याः समुपलभ्य राजमहिषी सुलक्षणा नाम सप्रणयमपृच्छत्। देवि नाहमायथातथ्येन विप्रलम्भनीया कथय तथ्यं केनेदमायथापूर्व्वमाननारविन्दे तवैषु वासरेष्विति। सा त्ववादीत् भद्रे स्मरसि किम् यदापि आयथातथ्येन किञ्चिन्मयोक्तपूर्व्वम्। सखी मे तारावली सपत्नी च किमपि कलुषिताशया रहसि भर्त्रा। मद्दौत्यापदिष्टा प्रणयमप्युपेक्ष्य प्रणम्यमानाप्यस्माभिरूपोढमत्सरा प्रावसत् अवसीदति च नः पतिः अतो मे दौर्मनस्यमिति। तस्यायेवैकान्ते सुलक्षणया कान्ताय कथितम्। अथासौ निर्भयोऽस्य प्रियतमाविरहपांशुभिरवयवैर्धैर्य्यं स्तम्भितामुपर्य्याकुलेन चक्षुष उष्णश्वासप्रोषिताभिरिव नातिपेशलाभिर्वाग्भिर्वियोगं दर्शयन्तं कथमपि राजकुले कार्य्याणि कारयन्तं पूर्व्वसङ्केतितैः पुरुषैरभियाश्चान्वयत्। तस्य किल स्थानस्थानेषु दोषानुद्दिश्य तथोच्चरणीये चतुर्थी यथा तन्मूलमेवास्य मरणं भवेदिति। अतोऽस्मिकाले यथेष्टमथ मुक्ता तस्य साधोः पुरः प्राणान्मोक्तुकामो बध्नामि परिकरमिति।

मयापि तत् पितृव्यसनमाकर्ण्य पर्य्यश्रुणा सोऽभिहितः सौम्य किं तव गोपायित्वा यत्तस्य सुतो यत्राकन्यया देवस्य राजवाहनस्य पादशुश्रूषार्थं देव्या वसुमत्या हस्ते न्यासः कृतः सोऽहमस्मि प्रत्यामि सहस्रमपि सुभटानामुदायुधानां हत्वा पितरं मोचयितुम् अपि तु सङ्कुले यदि कश्चित्पाततेत्तदङ्के प्रश्निकां सर्व्वमेव मे यत्नो भस्मनि हुतमिव भवेदिति।

अनवसितवचन एव मयि महानाशीविषः प्राकाररन्ध्रोदरेयेच्छिरः। तमहं मन्त्रौषधबलेनाभिगृह्य पूर्णभद्रमब्रुवम् अद्य सिद्धं नः समीहितम् अनेन तातमपनयमानाः सङ्कुले यदृच्छया पातितेन नाम दंशयित्वा तथा विषं स्तम्भयेयं यथा हतइत्युदास्येत। त्वया तु मुक्तसाध्वसेन माता मे बोधयितव्या यो यस्या वने देव्या वसुमत्या हस्तार्पितो युष्मत्सूनुः सोऽनुप्राप्तः पितुरवस्थां मत्तउपलभ्य बुद्धि

वधादिकष्टमाचरिष्यति। त्वया तु मुक्तकण्ठया राज्ञे प्रेषणीयम् एष खलु क्षत्रधर्म्मः यद्बन्धुरबन्धुर्वा दुष्टः स निरपेक्षं निग्राह्य इति। स्त्रीधर्म्मश्चैष यददुष्टस्य दुष्टस्य वा भर्त्तुर्गतिर्भर्त्तैवेति। तदहमनुनैव सह चिताग्निमारोक्ष्यामि अभिजनानुरूपः पश्चिमो विधिरनुज्ञातव्य इति। स एवं निवेदितो नियतमनुज्ञास्यति। ततः श्मशानागारमानीय क्षौमपटपरिक्षिप्ते विविक्तोद्देशे दर्भसंस्तरमधिशाय्य स्वयं कृतानुमरणमङ्गनया त्वया च तत्र सन्निधेयम्। अथ च बाह्यकक्षागतस्त्वया प्रवेशयिष्ये। ततः पितरमुज्जीव्य तदभिमतेनाभ्युपायेन चेष्टिष्यामइति।

स तथेति श्मशानतरुमूलमगमत्। अहन्तु घोषणास्थाने चैत्यवृक्षं घनतरविपुलशाखमारुह्य गूढतनुरतिष्ठम्। आरूढश्च लोको यथायथमुषितः स्थानानि उच्चावचप्रलापाः प्रसृताः। तावन्मे पितरं तस्करमिव पश्चाद्बद्धभुजमुद्धुरध्वनिमत्ताजनानुयातमानीय मदभ्यास एव स्थापयित्वा मातङ्गैरघोषयत्। “एष मन्त्री कामपालो राज्यलोभात् भर्त्तारं चण्डसिंहं युवराजं चण्डघोषञ्च विषाग्निनोपांशु हत्वा पुनर्देवोऽपि सिंहघोषः पूर्व्ववैरवशादमुष्मिन् पापमाचरिष्यन्निशासाधस्थभूमौ पुनरमात्यं शिवनागमाहूय स्कन्दमङ्गारवर्षञ्च राजवधायोपजप्य तैः स्वामिभक्त्या विदितगुह्यः राज्यकामुकस्यास्य ब्राह्मणस्यान्धतमसप्रवेशो न्याय्य इति प्राड्विवाकवाक्यादन्धुहरणाय नीयते। पुनरन्योऽपि यदि स्यादन्यायवृत्तिस्तमप्येवमेव यथार्हेण दण्डेन योजयिष्यति देव इति।” श्रुत्वैतद्वचनमन्ते मन्त्राजने पितुरङ्के प्रदीप्तशिरसमाशीविषं क्षिपम्। अथच भीता नामावक्रुश्य तथैव जनानुशीलः क्रुद्धव्यालदष्टस्य तातस्य विश्लिष्टमेव रक्षो विषं ध्यानादस्तम्भयम्। अपतच्च स भूमौ स्रस्तकरः प्रालपच्च सत्यमिदं राजावमानिनं दैवोदयश्चरेव स्पृशतीति यदयमक्षिभ्यां विना अवनिपतिना चिकीर्षितः प्राणैरेव वियोजितो विधिनेति। मद्गतश्च

केचिदन्वमन्यन्त अपरे पुनर्निनिन्दुः। दर्वीकरस्तु तमपि अवज्ञातं दष्ट्वा आसन्नलोकदत्तमार्गः प्राद्रवत्।

अथ मदम्बा पूर्णभद्रबोधितायां तादृशेऽपि व्यसने नातिविक्लवा कुलपरिजनानुयाता पद्भ्यामेव धीरमागत्य मत्पितुश्चरणाक्रम् उत्सङ्गेन धारयन्ती स्थिता राज्ञे समादिशत् एष मे पति स्वापकर्त्ता नवेति दैवमेव जानाति न मेऽनयास्ति चिन्तया फलम्। अस्य तु पाणिग्राहकस्य गतिमननुप्रपद्यमाना भवत्कुलं कलङ्कयेयम् अतोऽनुमन्तुमर्हसि भर्त्त्रा सह चिताधिरोहणाय मामिति। श्रुत्वा चैतत् प्रीतियुक्तः प्रतिसमादिशत् क्षितीश्वरः क्रियतां कुलोचितः संस्कारः उत्सवोत्तरश्च पश्चिमं विधिसंस्कारमनुभवतु मे भगिनीपतिरिति। अवकाशे तु मत्प्रतिषिद्धसकलमन्त्रवादिप्रयासे संस्थिते कामपालोऽपि कालदष्ट एवेति स्वभवनोपनयनममुष्य समाज्ञाप्य प्रकाशनाय महीपतिरभ्यर्मक्त। आनीतश्च पिता मे विविक्तायां भूमौ दर्भशय्यामधिशय्य स्थितोऽभूत्। अथ मदम्बा मरणमण्डनमनुष्ठाय सकलां सखीरामन्त्र्य मुहुरभिप्रणम्य भवनदेवताः यत्ननिवारितपरिजनाक्रन्दिता पितुर्म्मे शयनस्थानमेकाकिनी प्राविशत्। तत्र च पूर्व्वमेव पूर्णभद्रोपस्थापितेन च मया वैनतेयतां गतेन निर्व्विषीकृतं भर्त्तारमैक्षत। हृष्टतमा पत्युः पादयोः पर्य्यश्रुमुखी प्रणिपत्य माञ्च मुहुर्मुहुः प्रस्नुतस्तनी परिष्वज्य सहर्षबाष्पगद्गदमगदत्। पुत्र मयासि जातमात्रः पापया परित्यक्तः स किमर्थमेवं मामतिनिर्घृणामनुगच्छसि। अथवैष निरपराधएव ते जनयिता पुत्रमस्य प्रत्यानयनमन्तकाननात्। क्रूरा खलु तारावली या त्वामुपलभ्यापि तत्त्वतः कुबेरादसमर्प्य मह्यमर्पितवती देव्यै वसुमत्यै। सैव वा सदृशकारिणी नहि तादृशाद्भाग्यराशेर्विना मादृशोजनोऽल्पपुण्य एवार्हति वत्सप्रत्यागमामृतानि कर्णाभ्यां पातुम्। एहि परिष्वजस्वेति भूयोभूयः शिरसि जिघ्रन्ती अङ्कमारोपयन्ती तारावलीं गर्हयन्ती आश्लिष्यन्ती अश्रुभिरभिषिञ्चन्ती च उत्कम्पिताङ्गयष्टिरन्यादृशी

च्छमजनिष्ट। जनयितापि मे नरकादिव स्वर्गं तादृशाद्व्यसनात्तथा भूतमभ्युदयमारूढः पूर्णभद्रेण विस्तरेण यथावृत्तान्तमावेदितो भगवतोमघवतोऽपि भाग्यवन्तमात्मानमजीगणत्। ममापि च मत्संबन्धमाख्याय हर्षविक्लवात्मने पित्रेऽकथयम् आज्ञापयतु कात्र नः प्रतिपत्तिरिति। पिता मे प्राब्रवीत् वत्स दृष्टमेवेदमस्मदीयमतिविप्रात्यप्राबलयमस्याशुभग्रामम् अनल्पप्रतना च भूमिः उपहृताश्च मयातिबह्वः सन्ति सामन्ताः प्रकृतयश्च भूयस्यो न मे व्यसनमनुरुध्यन्ते सुभटानाश्चानेकसहस्रमस्त्येव ससुहृद्बुधदारम्। अतोऽत्रैव कतिपयान्यहानि स्थित्वा बाह्याभ्यन्तरकोपानुत्पादयिष्यामः। कुपितांश्चोपसंगृह्य पोष्यास्य प्रकृत्यमित्रान् उत्थाप्य सर्वतश्च द्विषो दुर्दान्तमेनमुच्छेत्स्याम इति। को दोष इत्याश्रिते तातस्य मतमन्वमंसि।

तथास्मासु प्रतिविधाय तिष्ठत्सु राजापि विज्ञापितोदन्तो जातानुतापः पारयामिकान् पदोगान् प्रायः प्रायुङ्क्त ते चास्माभिः प्रत्यवमृद्यन्त। अस्मिन्नेवावसरे पूर्णभद्रमुखाच्च राज्ञः प्रत्यासन्नमवगम्य तदेव कोऽदवसितभित्तिकोणादारभ्य उरगास्येन सुरङ्गामकार्षम्। गता च सा भूमिस्सर्वकक्ष्यममन्यकन्याकाजनं कन्यापुरद्वारम्। अवस्थितश्च दृष्ट्वैव सा मां नारीजनः। तत्र काचिदिन्दुलेखेव खन्वावबोधेन रत्नालोकान्धकारं निष्क्रामाना भूमिरिव चिराच्चिरी भगवतः कुसुमधन्वनो राजलक्ष्मीरिवानेककुलपतिदर्शनपरिचाराय मसाधिवेशम् प्रविष्टा निष्टप्तकनकपुत्रिकेवावदातकान्तिः कन्यका चन्दनलतेव मलयमारुतेन मद्दर्शनेनोदकम्पत। तथाभूते च तस्मिन्नङ्गनासमाजे कुसुमितेव काप्यार्यधीः पाण्डुरशिरसिजा स्थविरा काचिच्चरणयोर्मे निपत्य आसदीनमवृत दीयतामभयदानमस्मै अनन्यशरणाय स्त्रीजनाय किमसि देवकुमारो दैत्यपुत्त्रकल्पोऽथवा रसातलं विविक्षुः आज्ञापय कोऽसि कस्य चेतोरागतोऽसीति। सा तु मया प्रत्यवादि मा स्म भवत्यो भैषुः। अहमस्मि द्विजातिवृषभात्माम

प्राग्गाद्देव्यां कान्तिमत्यामुत्पन्नोऽर्थपालो नाम सत्यर्थे निजजन्मगृहमुपगन्तुं सुरङ्गयोपसरन्निशान्तरे वो दृष्टवान् कथयत काः स्थ यूयं कथमिह निवसथेति।

सोदञ्जलिरुदीरितवती भर्तृदारक भाग्यवत्यो वयं यास्त्वामेभिरेव चक्षुर्भिरनघमद्राक्ष्म। श्रूयतां यस्तव मातामहश्चण्डसिंहः तेनास्यां देव्यां लीलावत्यां चण्डघोषः कान्तिमतीत्यपत्यद्वयमुदपादि। चण्डघोषस्तु युवराजोऽत्यासङ्गादङ्गनासु राजयक्ष्मणा सुरक्षयमगात् अन्तर्वत्न्यां देव्यामाचारवत्याम्। अमुया चेयं मणिकर्णिका नाम कन्या प्रसूता। अथ प्रसववेदनया मुक्तजीविताचारवती पत्युरन्तिकमगमत्। अथ देवश्चण्डसिंहो मामाहूयोपह्वरे समाज्ञापयत् ऋद्धि मति कन्यकेयं कल्याणलक्षणा तामिमां मानवेन्द्रनन्दनाय दर्पसाराय वर्द्धयित्वा दित्सामि बिभेमि च कान्तिमतीवृत्तान्तादारभ्य कन्यकानां प्रकाशावस्थापनात् अतस्त्वयमरातिव्यसनाय कारिते महति भूमिगृहे रश्मिमयोच्चमभौमीर्णनानाभक्ष्यपेयागृहे प्रचुरपरिवर्हया भवत्या संवर्द्ध्यताम् अस्याश्च भाग्यवत्तु वर्षशतेनाप्यवाच्यमिति। स तथोक्त्वा निजवासगृहस्याङ्गनभित्तावर्द्धपादं किञ्चिद्विध्वस्तमनुसृत्य तेनैव द्वारेण स्थानमिदमस्मानयीविशत्। इह च नो वसन्तीनां द्वादश समाः समत्ययुः। इयं च वत्सा तरुणीभूता न चाद्यापि स्मरति राजा कामनियं पितामहेन दर्पसाराय सङ्कल्पिता त्वदम्बया कान्तिमत्या चेयं गर्भस्थैव द्यूतजिता समाप्ता तवैव भार्यात्वेन समवस्थगत तदत्र प्राप्तरूपं चिन्त्यतां कुमारैरेवेति। तां पुनरवोचम् अद्यैव राजगृहे किमपि कार्यं साधयित्वा प्रतिनिवृत्तो युष्मासु यथार्हं प्रतिपत्स्ये इति। तेनैव दीपदर्शितविवरपदेन गत्वा स्थितेऽर्द्धरात्रे तदर्द्धपादं प्रत्युद्धृत्य वासगृहं प्रविष्टो विश्रब्धसुप्तं सिंहघोषं जीवग्राहमग्रहीषम्। आकृष्य च तमग्निमिवाग्निशिखः स्फुरन्तं मन्दैव भित्तिरन्ध्रपथेन क्षेमसन्निधिमनैषम्। आनीय च स्वभवनम् आयस-

निगडसन्दानितचरणयुगलमवनमितमलिनवदनमश्रुवर्षरक्तचक्षुष-मेकान्ते जनयित्रोः संसादयम् । अश्रुपयश्च विलपताम् ।

अथ पितरौ प्रहृष्टतरौ तं निशाचाप्यं निशाम्य बन्धने नियम्य तस्या दारिकायाः यथार्हेण कर्म्मणा मां पाणिमग्राहयेताम् । अनाथकश्च तदाद्यमस्मदायत्तमेव जातं प्रकृतिकोपभयात् सम्भाषा मुमुक्षितोऽपि न मुक्त एव सिंहघोषः । तथाक्लिनाश्च वयम् अङ्गराजः सिंहवर्म्मा देवपादानां भक्तिमान् हतवर्म्मा चेति अमित्राभियुक्त मेनमभ्यसराम अभूवश्च भवत्पादपङ्कजरजोऽनुयायिनः । स चेदानीं भवच्चरणप्रणामप्रायश्चित्तमनुतिष्ठतु सर्व्वंदुश्चरितक्षालनमनार्य्यः सिंहघोष इति अर्थपालः प्राञ्जलिः प्रणनाम ।

देवोऽपि राजवाहनो बन्धुं पराक्रान्तं बहुपयुक्तां च बुद्धिं सुं स बन्धक्षे श्वशुरः पश्यतु मामित्यभिधाय भूयः प्रकृतिमेव पश्यन् प्रीति स्मेरः प्रश्नयतां तावदात्मीयं चरितमित्याज्ञापयत् ।

इति दण्डिनः कृतौ दशकुमारचरिते अर्थपालचरितं नाम
चतुर्थं उच्छ्वासः ।